In Public domain. Digitization Muthulakshmi Research Academy

TR NO 143

149 (87) 149

वारुणपद्धतिव्याख्यानम्

(भट्टशिवोत्तमकृता वरुणपद्धतिवृत्तिः)

Copied from the manuscript belonging to the Madras Government Oriental Manuscripts Library bearing the No. R 14871 [RC No 1025/52 (57)].

अत्र प्रकरणद्वयम्

1 दीक्षाप्रकरणम् 1-30 pp.

2 प्रतिष्ठाप्रकरणम् 30-58 "

In Public domain. Digitization Muthulakshmi Research Academy

ॐ

॥ वरुणपद्धतिव्याख्यानम् ॥

॥ हरिः ओं ॥

R14682

बीजनिर्दाहजनमत्र नाप्रवृत्ते यत्प्रयोजनम् ।
तत्तु तथा ज्ञायते सम्यक् तत्त्वं दीक्षाप्रतिष्ठयोः ॥

तत्रादौ तावच्छ्लोकार्थः —

प्रारिप्सितं वस्तु निर्दिशन्नादौ सर्वात्मना मङ्गलमभीष्टदेवतारूपं वस्तु पुरस्कृत्य नमस्कृत्य आचार्यपरंपरानुष्ठीयमानस्य शिष्टाचारस्य स्वात्मन्यपि कलास्तुतिरावेद्यते । स्ववचनप्रामाण्येन श्रोतॄणां तत्र प्ररोचना जायत इति अभीष्टदेवतानमस्कारपूर्वं वस्तु निर्दिशति ।—

मू
निर्वर्तितद्वयबीजाय नमः सोमाय शम्भवे ।
अथ संगृह्यते बीजं द्वयं दीक्षाप्रतिष्ठयोः ॥ १ ॥

शम्भवे नमस्कृत्य किंभूताय सोमाय उमया सहवर्तमानाय च, अत एव निर्वाणद्वयबीजाय शिवध्वनिःश्रेयसहेतुभूताय, अथ अनन्तरं दीक्षाप्रतिष्ठयोः द्वारद्वारिभावेन निर्वाणद्वयसाधनभूतयोर्यद्बीजं निदानं प्रवृत्तौ प्रयोजकं वा तत्संगृह्यते । सुखप्रतिपत्त्यर्थमस्माभिरिति वाक्यार्थः । तथाचाह लक्षणस्य शिवस्यापि कर्तृत्वेन संभवति । तस्मादुमया पराशक्त्या

2. -त्मिका करणभूतया निर्वाणाख्य बीजत्वम्। न त्वैका-
किन इति सूक्तम्। यत्पुनर्निर्वाणं मलादि बन्धविमुक्ति
पुरस्सरमात्मनः स्वरूपाभिव्यक्ति लक्षणं निःश्रेयसा-
पर पर्यायं तदुपायीभूताविद्याद्वैविध्यम्। तथाहि ज्ञाना-
धिरेको विज्ञानकैवल्यं निरधिकरण दीक्षायां निर्वाणा-
ख्यमिति द्वयं द्वाभ्यामेव ताभ्यामुपाधिभ्यां निर्वाण-
द्वैविध्यं भवति। द्वयोरपि शिवस्यैव सशक्तिकस्य हेतु-
त्वम्। अपरे पुनराहुः- सति विज्ञानकैवल्ये प्रथमं
प्रकृत्याधिकरण लक्षणम्। पराणिमादि सिद्ध्यपर पर्याय-
मेकं निर्वाणमिति कान्तकर्ममायकर्मानुबन्धमोक्षकैव-
ल्यात् परन्तु नराणामधिकार बन्धमोक्षापूर्वकर्मसाक्षा-
च्छिवत्वाभिव्यक्तिरिति। तदसत्।

पराणिमादि सिद्धेः मुक्तिविरोधित्वेन निःश्रेयस-
स्यापि भावात्। अपरे पुनराहुः- दीक्षा फलं निर्वाणम्
अन्यत्तु दीक्षिते शरीर विनिपातानन्तरं प्रभवति द्विज-
त्वोपेतः। यथा ऽनुपनीतस्य माणवकस्य यथापूर्वमव-
स्थित शरीरस्यापि शास्त्रबलादुपनयनसंस्कारेण
द्वितीयजन्माख्यं क्रियते, एवमिहापि दीक्षया निर्वा-
णं जीवन्मुक्तिरिति; तदपि मुक्तिदशा नातिवृत्ते निः-
श्रेयसं न संभवति।

अन्ये पुनराहुः- योगिद्वैविध्यादिक्रमान्निर्वाण-

द्वयं इति। द्विधा खलु पुंसो योनिः मातृरूपस्थानिका

बिन्दूपादानात्मिका च। यदुच्यते "योनिर्योनिमधि-

3 तिष्ठत्येकः" इति॥ तस्मात् पश्चिमजन्मारब्धमेकं नि-

र्वाणं ततः परं पुंसो जन्माभावाद्बिन्दूपादानयोनिरपि

मायैव तु। शिवव्याप्तिरिति परापरभावा-

द्द्विधा निर्वाणमिति। तदप्ययुक्तम्। दृष्टानतिवृत्तं

भुक्त्यनतिवृत्तेः। एवं योगाज्जीवन्मुक्तिरपि भुक्त्यनति-

क्रमान्न निःश्रेयसम्। तस्मात् प्रथमव्याख्यानोक्तमेव

न्याय्यः। शिवस्यैव द्विधा वचनान्न दीक्षाद्वैविध्येऽपि

निःश्रेयसस्यैव सद्योऽन्त्यफलभाक्। न तु दीक्षाप्रतिष्ठाभ्यां।

निर्वाणद्वय पक्षे द्व्युपन्यासः किं न क्रियते। निर्वाणद्वैवि-

ध्य नियमाभावादिति वदामः। तथाहि-

6 नित्यादिकर्मभिः शिवयोगपर्यन्तैः निःश्रेयस-

स्यैवानेकोपायतया निर्वाणद्वयनियमो न सिध्यति।

दीक्षामात्रोपायत्वेन तस्य निरपेक्षकारणनियमात्। द्वै-

विध्यनियमाद्यतेन निर्वाणद्वैविध्यमिति स्थितम्।

अथ निर्देशक्रमानुरोधेन दीक्षालक्षणं तद्भेदं चाह—

मू सपाशत्रयविश्लेषं शिवत्वं व्यज्यते यया।
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा ॥ २॥

ययैव क्रियया फलद्वयनिरूपणया दीक्षा कर्मणः

कर्मान्तरेभ्यः वैशिष्ट्यमुक्तं भवति। भक्तिवैराग्यलक्षणो

In Public domain. Digitization Muthulakshmi Research Academy

इति दीक्षायामधिकार इत्युक्तं भवति । निदानं प्रयोजकत्वो-
क्तं भक्तिः शिवे संसारे वैराग्यं इत्थ्वाऽनुग्रहलक्षणो हि
विबोऽपि विषयस्य व्यवस्थाऽऽस्थेया । अन्यथा भक्ति-
वैराग्ययोरपि अवस्थितविजनतया परस्परं व्याख्यातः ।
यस्य शिवे भक्तिर्वैराग्यं च संसारे न भवति ।

4 न तस्य दीक्षायामधिकार इत्युक्तं भवति । शक्तिपातफल-
त्वो योगात् तल्लक्षणत्वाद्दीक्षायां । तस्मात् शक्तिपात एव
दीक्षाबीजम् । फलप्रयुक्तत्वाद्दीक्षा विधेः । अत एवोक्तं (थं)
आचार्यानुशासनं अपतितशक्तिकं न दीक्षयेदिति ।
अथ कथं ज्ञायते आगिनसंस्कारयोग्ये तयोवतो भक्ति-
वैराग्ये संभवत इति । नैष दोषः । शक्तिपातस्यैव तद्-
ज्ञानकारणत्वात् कोऽयं शक्तेः पातो नाम तस्याविभुत्वा-
दिति चेत् - विभुत्वेऽपि तस्य मुक्तिपरिकराभावात्
सह सोपजन्तेः पात इत्युपचर्यते । कादाचित्कत्वं च
तस्य सहकारिणः कर्मसाम्यस्य तस्य कादाचित्कत्वा-
त्कृतम् । तदुक्तं श्रीमत्स्वायंभुवे -

शिवेच्छया पुरानन्ता शैवी शैवार्थदायिका ।
सा शक्तिर्निपतत्योषा पुंसो जन्मन्यपश्चिमे ॥
तन्निपाताशयस्य मलं संसारकारणम् ।
क्षीणे तस्मिन्निसा साक्षात्परं निःश्रेयसं प्रति ॥
स देशिकमनुप्राप्य दीक्षाविच्छिन्नबन्धनः ।

प्रयाति शिवसायुज्यं निर्मलो निरुपप्लवः ॥ इति।

२

अत्र कर्मसाम्यं सहकारिकारणमित्युपपादितम्।
तदुक्तं श्रीमत्स्वायंभुवे स्रोतत इति नेह प्रतन्यते ॥
प्रतिपादनस्य चेदं मूलम्। यदुक्तं श्रीमत्किरणे —

समे कर्मणि सञ्जाते कालान्तरवशादिह।

तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यजेत् ॥ इति।

यथा भक्तिवैराग्ये दीक्षाचिह्ने तथा शिवे संसारे तद्वि-
चिह्नमिति वदितव्यं ज्ञायते शिवसंसारे भक्तिवैराग्य-
5 योगादतो ज्ञानस्यापि हेतुः शक्तिपात एव क्षीणमलस्य
तन्निरुद्धं हरच्छक्ति भया प्रसरं भावी मलक्षणस्य
शक्तिपातनिमित्तत्वादित्यभिप्रायेण प्रागुक्तं निगमय-
मू न्नुपसंहरति। तस्मात् ज्ञानं च भक्तिश्च वैराग्यमिति चामलः।

दीक्षितस्येह चिह्नानि पशोस्त्वेतानि नाञ्जसा ॥ ३ ॥

अतः पतितशक्तिकः स्वलवाणोऽपशुः तस्य भक्तिज्ञान-
वैराग्याणि नाञ्जसा जनाङ्कुवत्यापि हेतोः स चेह दीक्षा-
प्रयोजकः शक्तिपात एव। अन्यथा दीक्षितस्यैतानि
चिह्नानि न भवेयो न भवन्ति। दीक्षितस्य विज्ञानभक्ति-
वैराग्यानि चिह्नानि अवसीयन्ते। पतितशक्तिक एवायं
दीक्षित इति। तदयमत्र क्रमो दाहुः। प्रथमं कर्मसाम्यम्।
ततः शक्तिपातः, ततः शिवे ज्ञानं, ततो भक्तिः ततः संसारे
वैराग्यं, ततो देशिकान्वेषणं, ततोऽनुप्रापणं तस्य च यत्नेन

In Public domain. Digitization Muthulakshmi Research Academy

च ततो दीक्षा, ततः पाशविश्लेषः, शिवत्वाभि-
व्यक्तिः, निःश्रेयस इति। तदर्थं च शिवात् ज्ञानं
श्रीमत्कामिकादि शिवशास्त्रलक्षणमनेकभेदो-
पभेद भिन्नं तत्सर्वं भीमं प्राप्यते। यथोक्तं श्रीमत्स्वा-
यंभुवे —

अथानादिमलमायाख्यकर्मबन्धविमुक्तये।
व्यक्तये च शिवत्वस्य शिवाद् ज्ञानं प्रवर्तते॥
तदेकमप्यनेकत्वं शिववक्त्राम्बुजोद्भवम्।
परापरेण भेदेन गच्छत्यर्थप्रतिश्रयात्॥ इति॥

ननु दीक्षितस्य शिवशास्त्राधिगमः ततः कथं शिवे
ज्ञानस्य दीक्षाहेतुत्वं न शिवशास्त्रलक्षणात्। ज्ञान
6 दीक्षा प्रयोजनमपि तु पतितशक्तिकस्य तद्भाविन्यव-
शाल्लौकिकव्यवहारमात्रेणास्तीश्वर इति शिवसद्भावाभ्यु-
पगमलक्षणज्ञानमित्यविरोधः॥

अथ पशोस्त्वेनाभिमतस्य इत्युक्तेः कीदृक्
पशुः किं वा तल्लक्षणमित्यपेक्षायां पशुपाशस्वरूपाव-
गतेरपि दीक्षाबीजत्वं ज्ञापयितुं तल्लक्षणतद्रूपयोगीनि
विशेषणानि आह —

मू किञ्चिद्ज्ञो मलिनो भिन्नः कर्ता भोक्ता स्वकर्मणाम्।
शरीराद्भिन्नो विभुर्नित्यः सकार्यः सेश्वरः पशुः॥ ४॥

इति लक्ष्यनिर्देशः। किञ्चिद् ज्ञ इति लक्षणमुक्तं भवति॥

ततोऽन्यत्तु लक्षणं प्रागुक्तत्वेन तत्र कल्पं विशेषण

मात्रं कथमिदं लक्षणं किन्त्वीदृश इति। पतिपशुपाशा-

मेषु सर्वेष्वनन्तत्वावि सति पशुः किन्त्वीदृश इ-

त्येतावता पशुत्वमात्रं कथमिदं लक्षणं किन्त्वीदृशः

सर्वज्ञत्वात्। न च पाशत्रयं तस्य ज्ञत्वात् न हि व्या-

न
कृत्यन्तरमस्ति मुक्तात्मनः प्राक् पशुभावेन तदव-

स्थान्तरत्वाद्वा प्रतिबन्धादेः पुनः पाशविश्लेषहेतुतया

शक्त्यन्तर्भावा स्वशक्तेश्च पत्यन्तर्भावा स्वशक्तिमतः ज्ञान

हि पतित्वं कथं पुनरात्मनो ज्ञत्वकर्तृत्वे तुल्ये पशुरिव

सर्वज्ञत्वाभावात् पशुत्वं नेत्युक्तं मलिन इति मल

सद्भावे लिङ्गमुक्तं कर्ता भोक्ता स्वकर्मणां शरीराद्य इति।

कर्ता ज्ञानाधारत्वात् कृत्स्नस्य कर्तृत्वमित्युक्तं भोक्तेति

भोगमात्रस्य कर्तेति यावत्। कस्य भोक्ता इत्याशंक्याह

सुखदुःखमोहनमिति वक्ष्ये तद्धेतुमिश्रान् उपल-

7. क्षयति। स्वकर्मणामिति। स्वकर्मणां हि न स्वरूपेण भोग्य-

त्वं, अपि तु सुखदुःखादि फल भोजनेनेति यावत्। स्वश-

ब्दात् प्रत्यात्मकं भोगभेदं तद्धेतु भेदं च व्यवस्थित-

मावेदयति। किमायतनम् भोगस्यास्य त उक्तं शरीराद्यं

इति। तद्धि धृतिः स्थानमिति पर्यायः। तच्छरीरमात्रमा-

त्मा किन्तु तद्व्यतिरिक्तः स्वव्यतिरेकेण शरीरस्य स्वाश्रय

स्वारम्भककर्मरूप सुरनरादि भावेन शरीराणां वैचित्र्या-

In Public domain. Digitization Muthulakshmi Research Academy

सिद्धं भवति। कर्तृत्वादे र्मलादिसद्भाव लिङ्गं भव्य-
त्वानुपपत्तेः शुद्धस्याज्ञानमल शब्दार्थस्तदभावेन
38a भोक्तृत्वं स्वरूपं उपपद्यते। यस्मात्तदुक्तं श्रीमत्स्वायम्भुवे-

यथा शुद्धिर्न पुंसोऽस्ति शक्तिर्भोगेषु किं कृता। इति

शिवत्व इत्यर्थः। किं लब्धमात्मा द्वैत निरास इति क्रमः।
नस्या भैक्येव बन्ध मुक्त्येव पाशादिविश्लेषोपपत्तिः।
अत एवोक्तं कर्ता भोक्ता स्वकर्मणामिति। स्वरूप
विभागाभावे बन्धमुक्त्यादि वैचित्र्यादि भोगात्। आत्मि
च तद्वैचित्र्यं। अतः पशवो भिन्नाः इति किमद्वैतवा-
दस्यावलम्बनम् + विभुर्नित्य इति किमर्थं बुद्धीन्द्रि-
यशरीराणां न भोक्तृत्वं संभवति। जन्मान्तरसंबन्धा-
भावेन तत्प्रति सम्बन्धाभावा पञ्चमार भोगप्राप्ति-
सम्बन्धात् तु: स्वल्पं भोक्तृत्वं इतरथा भोगतद्धेतूनां
वैयधिकरण्यं स्यात्। अत एवोक्तं संस्कार्य इति।
संस्कारो हि कर्मादिभिः वासनारूपः येन तत्कालेषु
देशान्तरभाविषु भोक्तृत्वमुपपद्यते। इष्यते चास्य
भोक्तृत्वं जन्मान्तरालब्ध कर्मानुरूपं। अत एवास्य-
8 दीक्षावसाने नित्यतया विभुतया चास्य देशान्तर-
कालान्तरभावि दीक्षाफल भोगित्वोपपत्तेः। कथं
भव्य जन्मान्तर परतन्त्रात्व स्व भोगे कर्तृत्वं भोक्तृत्व-
सिद्धताम् सेश्वर इति ईश्वरवादयम्। तत्प्रेरणाया

कर्ता मोक्षे यथोक्तम्-

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥ इति॥

पशुलक्षणं च दीक्षायां जन्मतश्च तत्रतत्रैव मलादि-
पाशस्य शोधनीयत्वादत एव पाशत्रयलक्षणमनुक्र-
मेणाह—

पाशा अपि त्रयो ज्ञेया मलो माया च कर्म च।

मलं नाम पाशो निजदृक्क्रियारोधी मलस्य पुरस्ताद्देहहेतुः।
माया कर्मणो रागं तनुकरणे तुल्ये मायीयमशरीरज-
त्वं कर्मपाशस्य परमं निर्दिष्टं निर्मितं तदेव मायापाशस्या-
न्तरङ्गत्वात् तदपेक्षया कर्मपाशस्य बहिरङ्गत्वं चा-
ङ्गीकरणीयम्। प्रवाहपुनरनादिसिद्धचक्रे वर्तमाने
मलादिषु परस्परं हेतुहेतुमद्भावोऽप्यस्ति। तथाऽन-
नुपगमे निजस्यापि मलस्य परिणामानुपपत्तिः।
निमित्ताभावात् कर्मविपाकवैचित्र्यमेव हि भुक्तौ
मुक्तौ साक्षान्निमित्तं मायामलपरितो मलस्तु यथा-
कर्मविपाकं परिणतत्वोऽङ्गाङ्गनिमित्तं अत एवाहि
कर्मणि परिक्षीणे मुक्तिरिव पुंसो मलमायाभ्यां
भवति। निमित्ताभावे नैमित्तिकाभावात्। परस्पर
हेतुमद्भावेन चक्रवच्चानादिषु वर्तमानेषु वासित्व-
स्वीगन्तुकाभावस्तेषां क्रमेण द्वेशः+कृतः। अथ-

In Public domain. Digitization Muthulakshmi Research Academy

यथोद्देशक्रमानुरोधेन मलस्य तावल्लक्षणमाह–

मू ७. [मलमशुद्धिरज्ञानं तच्चैतन्यनिरोधकम् ॥५॥

मलमिति लक्ष्यनिर्देशः। अशुद्धिरिति लक्षणम्।
अज्ञानमिति तत्प्रतिपादकमुपपादकं चैतन्यं
निरोधकमिति तदेवाशुद्धिरिति चैतन्यनिरोधक
इत्यर्थः॥

अथ मायापाशलक्षणमाह–

मू [माया कलादिपृथिव्यन्ता तद्भवा तत्त्वसंहतिः।
कलादिपृथिव्यन्ता तत्त्वसंहतिः यतो भवति तादृशं
तद्भावोपादानाद्ध्येवोक्तम् भवति। अथ कर्मलक्षणमुच्यते–

मू [धर्माधर्मात्मकं कर्म वेदसिद्धमिति वाक्यशेषः।
तस्मादुक्तार्थस्यायं भुवि धर्मशासनं संवित्तिराम्नायादेव
ज्ञायते इति मलमायादि कर्मभिः वासनाभिः पुं-
मू सोऽन्वयमाह – [एतैः पाशैः युतः पशुः॥ पाशत्रय- ६
स्य प्रागुक्तक्रमानुरोधेन प्रतिपाशं फलभेदगर्भं
हेतुमद्भावं निगमयति। [पशोरज्ञतया मायायोगो मू
भोगाय कर्मणाम्। संयोजनं अथास्यैवं पाशत्रय
बन्धे सति मुक्तिपरिकरं तदुत्पत्तिक्रमं सूचयति–

मू [स मायादितीश्वरेच्छातो मुक्तिर्नान्या यथा यतः॥७॥
ईश्वरेच्छातो विना अन्यः मुक्तिहेतुः नास्तीति भावः।
यस्मादीश्वरेच्छामन्तरेणास्य मुक्तिर्न संभवति।

In Public domain. Digitization Muthulakshmi Research Academy

ततः कारणत्वात्सति शक्तिपाते दीक्षया प्रसंख्या-
नुरणया कुणपदेव कृत्स्नतश्चापि सुखादिभोग-
क्षेपणतः। भोगे सति पाशबन्धक्षयो भवति। ततो
मुक्तिरुक्तफलमिति भावः।

ततः सुखादिकं कृत्स्नं भोगं भुङ्क्ते स्वकर्मतः॥
संसारी स पशुर्बन्धो मुक्तः पाशत्रयोज्झितः॥ ८॥

पशुः पाशत्रयबद्धः संसारी पाशत्रयोज्झितो मुक्त
इत्येतावानेव सूत्रार्थः।

अथ दीक्षाभेदं दर्शयितुकामः तदर्थं दीक्षाभेदो-
त्रैविध्यं स्वरूपभेदञ्च वक्तुमारभते। त्रिविधोऽयम-
नुग्राह्यः
सकलः। प्रलयाकलः। विज्ञानाकल इत्येतं
स्वरूपमप्युना नाति- ॥ ९॥

मायाकर्ममलैर्युक्तः सकलः सोऽभिधीयते।
मलकर्मावृतो यस्तु स भवेत्प्रलयाकलः॥ १०॥

मलैकबन्धो सम्बन्धो विज्ञानाकल उच्यते॥

सुबोधनमेतत्॥ अथ संग्रहदीक्षाभेदं सहेतुकं दर्शयति-

मू निराधारोऽथ साधारः शिवस्यानुग्रहो द्विधा॥

स्फुटार्थं तत्रोपाधिरस्यते-

मू शिवोऽनपेक्षिताचार्यो द्विधा शक्तिनिपातनात्॥ १३॥

मू स्वयमेवानुगृह्णाति विज्ञानप्रलयाकलान्॥

विज्ञानकेवलेषु शक्तिपातस्तीव्रतरः श्रेष्ठः। तदपेक्षया

In Public domain. Digitization Muthulakshmi Research Academy

परस्तीव्रः प्रलयाकले । इति शक्तिपातद्वैविध्यम् नि-
राकारे साकारे त्वन्यथा भेदमाह-

मू. [आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः ।। २४ ।।

मू. [भगवाननुगृह्णाति स एव सकलानपि ।।

अत्र कारणमाचार्यः सकलदीक्षायां दीक्षाकर्तृ शिव एव । शिवादन्यस्य पाशविश्लेषणसामर्थ्यासंभवादित्यभिप्रायः । मन्द मन्दतर तीव्र तीव्रतर भावाच्छक्तिपातस्य चातुर्विध्यम् । मन्दादिभावे हेतुः स्वशिष्याचार्ययोः मन्दादिभाव चातुर्विध्यम् । नहि सर्वेऽनुग्राह्याः समशक्तिपात उपलभ्यन्ते । अपि तु तारतम्यभावादेव । तस्मादाचार्यसौष्ठवेऽपि शिवात्मना तारतम्यानुरूप एवानुग्रहः प्रवर्तते । एवमाचार्या अपि सर्वे न समानशक्तिका उपलभ्यन्ते । अपि तु मन्दादिभावेन तस्मादनुग्राह्याः क्षेत्रेऽपि अनुग्रहशक्तिमन्दादपि मान्यमनुग्राहकत्वं संभवतीति तदनुरूपं ग्रहणीयम् । अत्रैवमनुग्रहे दीक्षाबीजे सति ततो दीक्षाप्रवृत्तेरित्याह-

[शिवस्यानुग्रहाद्दीक्षा जायते कृतकर्मणाम् ।। २५ ।।

परिपक्वमलाः कृतकर्माण इत्युच्यन्ते । अपरिपक्वमलेषु दीक्षानिषिद्धा इत्यर्थात्सिद्धम् । अतः पुनः कृतकर्मसु दीक्षा जायते । दीक्षायेनैव विज्ञा । तेषामपि मलपाकवैचित्र्याद्दीक्षास्वरूपविशेषं प्रदर्शयितुं

आरभते –

मू. [सा चानेकविधा प्रोक्ता तत्र पञ्चोऽथ मुच्यते ।

सा चेति साक्षीकरणप्रत्यभिज्ञापकम् ।

मू. [चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ॥ २६ ॥

मू. [शास्त्री च योगदीक्षा च हौत्री त्यादिरनेकधा ॥

आदिशब्दात् पादोदकप्रदानप्रेरकबोधकाद्युक्तं भवति ।

अथ यथानिर्देशः । क्रमं दीक्षाणां पृथग्लक्षणमाह –

मू. [चक्षुरुन्मील्य यत्तत्त्वं ध्यात्वा शिष्यं समीक्षते ॥ २७ ॥

मू. [पाशबन्धविमोक्षाय दीक्षेऽयं चाक्षुषी भवेत् ॥

इत्यादि निरुपाधिकः । तत्त्वशब्दः शिवादन्यत्र वर्तते ।
अत्रापि तत्त्वार्थपरं तत्त्वमित्थं यथार्थं मनसा
साक्षाद्दीक्षाबीजमित्युक्तं भवति । एवं सुबोधम् ॥

12 [निधाय दक्षिणे हस्ते शिवं सर्वाङ्गसंयुतम् ॥ २८

मू. [संस्पृशेच्छिष्यमूर्धादि स्पर्शदीक्षा भवेदियम् ॥

इत्यादि । अत्रापि तत्त्वं ध्यात्वेत्यनुवर्तते । तन्मूल-
त्वाद्दीक्षार्थवृत्तेः शिवं सर्वाङ्गसंयुतमिति शिवप्र-
तिपादकतया शिवमूलमन्त्रं हृदयाद्यङ्गषडङ्गयुतं
दक्षिणे हस्ते निधायेति । अन्यत्स्पष्टार्थम् ॥

मू. [तत्त्वे चित्तं समाधाय संहितान्तरतेजसा ॥ २९

मू. [उच्चारे संहितामन्त्रा नाडीके च प्रकीर्तिता ॥ नाडीके (?)

इत्यादि । तत्त्वे चित्तसमाधानाद्धेतोः तत्स्थं कृत्वा शिष्याने

In Public domain. Digitization Muthulakshmi Research Academy

पुर्यष्टकारणं स्यादिति तेजोपबृंहितमुद्दीपितमविज्ञा-
ध्यते बोधजनः शिवभावः सर्वार्थः संहितामन्त्रा-
नुष्ठानादिति वा दीक्षालक्षणमित्युक्तम्। मूलब्रह्मा-
ङ्ग मूर्त्यासनं संहिता शिवशासन इति श्रीलैङ्गेऽप्युक्तम्।

मू [मानसं विधिमाश्रित्य मानसी त्वभिधीयते।

इत्यादि यद्वा हि: क्रियया निर्वर्त्यं तत्सर्वं मनसा विधी-
यमानं मानसो विधिः तेन मानस दीक्षा कृता भवति।
यकारादि हाणि प्रागुच्यमान तत्त्वे चित्तं समाधायेत्या-
कथ्यते –

मू [मानसं विधिमाश्रित्य मानसी त्वभिधीयते ॥] २०॥
[शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता ॥]

~~[illegible]~~ इत्याद्युक्तम्। ननु श्रीमत्स्वायंभुवे –

samayastha

समयी न समर्थस्तु शास्त्रेऽधिकृतः पुमान्।

इति कथं दीक्षा विकल्पितया शास्त्रदीक्षालक्षणमुच्यते।
समय दीक्षादि दीक्षितस्यैव शास्त्रश्रवणेऽधिकारान्नैष
13. दोषः। समयिन एव शास्त्रस्य संप्रदाने दीक्षान्तरसंपत्तेः –

[योगेन योगदीक्षा स्यात् शिवत्वे सा व्यवस्थिता]२२॥

न रुद्रत्वेनापि ईश्वरत्वेऽपि अपि तु शिवत्व एव नि-
मित्त योगदीक्षेयं व्यवस्थितास्यात् इति नियमविधि-
रयं। यद्वा निर्वाणाख्या शिवत्वे लब्ध एवत्थं योग-
दीक्षा कर्तव्याधिकारित्वादित्यर्थः। ~~[illegible]~~

In Public domain. Digitization Muthulakshmi Research Academy

अथवा योऽयं दीक्षैवं न रुद्रपद प्रदान पर्यन्त-
साधिनी अपितु शिवत्वाभिव्यक्तये दाव सम्पद्यत इति
सूत्रार्थः। अत्र निर्दिष्टया होत्र्या लक्षणमाह-

[रुत्रः कुण्डवती होत्री] कुण्डमण्डलादिद्वारा बहिः
क्रियमाणा समयादिदीक्षा होत्री त्युच्यते। तदेवं साधि-
करण दीक्षाया लक्षणमुक्त्वा इदानीं तस्या द्वै-
पाद्यतो द्वैविध्यं वक्तुमुपक्रमते। [सा द्विभेदा किलोदिता
सैव प्राकृत साधिकरण दीक्षानन्तर प्राकृता होत्रीति
विशेषं सूचयति। किल शब्दः स्वयं स्वबोधम्। यथा-
समासव्यासाभ्यां तथोपक्रान्तं स्वयमेव व्यञ्जयितुं कथं
सा द्विभेदिते त्याशंक्याह-

[समासाद्द्विविधैवेयं दीक्षा तद्वैरिहोच्यते। २२॥

न प्रागिव व्याख्यात्वादिविस्तरात्। अपितु समा-
साद्द्विविधैवेयं दीक्षा साधिकरणा तद्वैरपि अकालदी-
क्षापि तद्भेद द्वैराचार्यैरुच्यत इति तास्मिन् द्वैविध्ये
उदाह्रियते-

[ज्ञानवती अभेदका क्रियावत्यपरा स्मृता।

तद्यथा चष्टे। विनेयस्यान्तःकं मायावतीति सम्यकृत-
त्वा वबोधयेति। यस्य तत्त्वे शिवे सम्यगनुभवतो
बोधो विद्यते स तत्र स त्यक्तत्वे देशकालादिभेदतः
न तु साधकानाचार्यो रिच्यते इति अर्थात् सर्वस्यापि

In Public domain. Digitization Muthulakshmi Research Academy

इतरस्याप्यवृत्तिरायां नैव न्यूनता भवति । निर्बीज दीक्षाया बाल बालिशादि गोचरायाः एवपूर्वकृतत्वात् समये पुनर्वा कयोरपि व्यावृत्त्यङ्गीकारे तयोरभयत्रापि बीजसबीज दीक्षयोः व्यावृत्त्या साङ्कीकरणत्रयमानत्व एव स्यात् । नवानवयो भिन्नत इति तद्व्यावृत्ति सबीजायाः प्रामाणिकी भवति । देशकालादि भेदत इति । किमुक्तं भवति न सर्वो देशः साधकानां सम्पदनुगुणः मुक्तः शास्त्रे । अपितु विशिष्ट देशकालविति तथाचार्यैराचार्यवतो-द्भव प्रशस्त मन्त्र शास्त्रेषु शरद्वसन्तादयश्च दीक्षाका-लाः प्रशस्ताः । आदिशब्दो यथोक्त देशकाल संभवतो सिद्धौ देशान्तर कालान्तरं मौनमपि प्रशस्त जन्मस्वरू-प बोधकशक्तिमः ईश्वर तत्त्वार्थवेदी नृपुंसां संभवादपि साध-कार्याभावमनुमन्यन्ते । नहि देशादि वैशिष्ट्यं दीक्षायाः स्वरूपत उपयुज्यते, अपितु सा दुर्लभतया दीक्षोत्कर्षे तिरेवस्यात् । यथा, सबीज निर्बीज भावाद् द्वैविध्यमुक्तं तथा सबीज दीक्षा-या एवा पादयन्तरतो द्वैविध्यं पुनराह –

[धर्मी धर्मात्मकं कर्म प्रागागामि विचित्रकम् । 32
[सञ्चित्य शोध्यते यत्र सैवोक्ता शिव धर्मिणी ॥

सार्व देशिक सार्व कालिक धर्माधर्मयोः तन्निबन्धनानां भोगानां च प्रसंख्यान भेद, वशात् बुभुक्षु मुमुक्षु इत्याकाङ्क्षि-कारि भेद वशात्क्रा हुति दान भेदात् फल भेद व्यापिकान

In Public domain. Digitization Muthulakshmi Research Academy

स्यात्। तथा शौचादौ गौरवलाघवाभ्यामनुष्ठेये कर्मणि शिवधर्मित्वान्नित्यमनुष्ठेयं लोकधर्मित्वान्नित्यमाचार्यस्य इत्थं शिवशास्त्रान्नित्यमेव सन्तानिनां नित्यं भिन्नसन्तानिनामिति व्यवस्थाप्यते। एवमुपोद्घातानन्तरं पुनरवलम्ब्य प्रकृतायामेव साधिकरणायां दीक्षायां द्वैविध्यमाह—

नित्यमात्राधिकारित्वात्समयिन्यथ पुत्रके।
दीक्षा निरधिकारैव नैमित्ताद्यधिकारिणी॥

साधिकार निरधिकार भेदाद्द्विप्रकारा साधिकरणदीक्षा। तत्र समयिपुत्रकयोः निरधिकारैवास्तु। तस्मात्तयोः नित्यमात्राधिकारो नैमित्तिककर्मानधिकार इति निर्बीजदीक्षापक्षे समानमेतत्। समयिपुत्रकयोर्निरधिकारैव समयाचारस्य दीक्षेति सबीजा दीक्षा स्वयं वस्तुवैचित्र्या सामर्थ्यापेक्षत्वात्तद्द्वयस्य। तस्य चानियमेनापेक्षिकत्वात् सति सामर्थ्यादौ सबीजा तदभावे निर्बीजेति विकल्पस्य निरधिकारत्वात्पुनरपि विकल्पोऽवेति। अथवा उभयाधिकारायां विकल्पमाह—

साधकाचार्ययोर्नित्यं नैमित्तिककाम्यकर्मसु।
सर्वत्रैवाधिकारित्वात् साधिकारैव सा तयोः॥

निगदव्याख्यानमेतत्॥

अथ सबीजनिर्बीजसाधिकारनिरधिकारसाधारण्येन समयदीक्षां पक्षीकृत्य बीजद्वैविध्यं दर्शयति—

In Public domain. Digitization Muthulakshmi Research Academy

मू {यत्र रुद्रपदे योगो योगो यत्रेश्वरे पदे।} ३३

मू {शिखाच्छेदो न यत्रास्ति दीक्षा सा समयी द्विधा ॥ ३४

रुद्रपदप्राप्त्या ईश्वरपदप्राप्त्या च समयदीक्षा द्विवि-
धं। शिखाच्छेदाभावादुभयसाधारणं इत्युक्तं भवति।

16 ननु कथं शिखाच्छेदाभावः समयदीक्षामात्रायामेव
शिखाच्छेदस्यापि श्रीमत्स्वायंभुवे विधानात्।
"वस्तुत्रयविधानार्थं पश्चात् होममाचरेत्।
होमान्ते तु शिखां छित्वा पूर्णाहुतिं ततः क्रमात्" इति।
सत्यम् इत्थं स्वायंभुवे, तथापि दिव्यागमेषु विप्रकीर्णोप-
देशसम्भवान्निर्वाणदीक्षाक्रमेव शिखाच्छेदः। समय-
दीक्षायामप्युच्यमानायामुच्यत इत्युक्तमाश्रयितुमित-
व शास्त्रादिनिर्युक्तम्। शिखाच्छेदो न यत्रास्तीति सूत्रं।
39a अथ निर्वाणदीक्षामपि कुर्यात् पाशच्छेदे सति सौपाधिकं
विषयभेदं दर्शयन्नाह-

मू {यत्र पाशशिखाच्छेदो योगः शिवपदे भवेत्।} ॥ ३५॥

मू {निर्वाणाख्या तु सा सैव पुत्रकेनाभिषेकतः।} इति

शिखाच्छेदः पाशच्छेदहेतुभूतस्य तदभिषेकरहिता
स्यादित्येव द्विविधं हृदि कृत्वाऽभिषेकरहितायाः वि-
षयं व्यवस्थापयति। सैव पुत्रकेनाभिषेकत इति। अत-
उक्तं भवति अनभिषेकफला निर्वाणाख्या दीक्षा निरधि-
कारं पुत्रकमेव विषयीकृत्य कर्तव्येति। ततश्चार्थात्

पुत्रलक्षणमप्युक्तमेव। निरधिकतया कृतसमय निर्वाण-
दीक्षा। छिन्नपाशः शिवो भिषेकान्तो यः पुत्रको नामेति
या पुनरभिषेकफला निर्वाणदीक्षितस्याऽऽविहितं
सबीजमाह—

मू [साध्यमन्त्राभिषेकाख्या साधकस्य प्रकीर्तिता ॥ ३४ ॥

मू (सर्वविद्याभिषेकेण भवेत्स्वाचार्यगोचरे ॥)

सिद्धिकामः खलु मन्त्रान् साधयेत्। न मुक्तिकामः।
17 सिद्धयश्चाणिमादिलक्षणाः। शान्तिकपौष्टिकक्षौद्रक-
र्मादिसाध्याश्चानेकविधाः। नैव समन्त्राः सर्वसिद्ध्यनु-
गुणाः। अपि तु कस्मादेव कस्याश्चिदिति स्थितिरिति।
तेऽणिमादिसिद्धये यो मन्त्रः शक्तः। ततः सिद्धिकामस्य
साधकस्य स्वनाम जन्मनक्षत्राद्यविरोधे सति सम-
न्त्रः साध्यो भवति। तस्य च साधने दीक्षितस्याधि-
कारात् साधिकारैव सति तदनुरूपाभिषेकः फलति।
भवेत्स्वाचार्यगोचरे आचार्यभावे कर्तव्ये इत्यर्थः। ततः
सर्वविद्याधिकारेण दीक्षितोऽभिषिक्तश्चाचार्य इ-
त्याचार्यमर्त्यसिद्धम्। तदेव साधिकरणे दीक्षा क्रिया-
वती ज्ञानवती सबीजा निर्बीजा साधिकारा निरधिकारा
चेत्येवमनेकप्रकारा समयिपुत्रकसाधकाचार्याणां व्य-
वस्था कर्तव्येति स्थितम्।

अथेदानीमेकत्रैव समस्तस्यास्योक्तस्य तात्पर्यार्थ-

-व्यापक युक्त्या समस्तं नियमयति।

शिवसंस्कारयुक्तस्य शिवत्वव्यक्तिसम्पादनात् ॥३६॥

क्रियया वाऽथ ज्ञातया वा दीक्षा वा सर्वतो मता ॥ इति

परमोद्देश्यतया शिवत्वसम्पादनस्य सर्वदीक्षाव्यापकत्वात्। अथ दीक्षाफलं पुरस्कृत्य स्वरूपतो लक्षणं तन्निमित्तभेदं च संक्षिपत्याह—

दीक्षया मुच्यते देही त्रिविधाद्भवबन्धनात् । ॥३७॥

सा च दीक्षाध्वसंशुद्धिः स चाध्वा षड्विधो मतः ॥

त्रिविधं मलमायाकर्मरूपाद्भवबन्धनाद् देहिनो मुक्तिः दीक्षाफलं अध्वसंशुद्धिः दीक्षास्वरूपं षड्वि-

18 धोऽध्वा तच्छोधनतया निमित्तं दीक्षयेति दीक्षया मुच्य-त इति नियमार्थं दीक्षयैव देहिनो मुक्तिर्नान्येनेति।

नचैवं ज्ञानयोगक्रियाचर्याणां वैयर्थ्यं दीक्षाधिका-रत्वात्तेषाम् अध्वनो स्वरूपं षड्विधं च दर्शयति—

मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनात्मकः। ॥३८॥

तत्त्वाध्वा च कलाध्वा च विंशत्येकपरं शिवम् ॥

संहारवर्त्मनाऽध्वनां निर्देशः ततः शुद्धे संहाराश्रयत्वे लयः खलु साक्षाच्छुद्धिशब्दार्थः। सा च कार्यं कारणे न तु कारणस्येति हृदयं सूत्रकारस्य ज्ञानेन विंशत्येकं शिवं परम् इति। तत्र षडध्वनामाविर्भावतिरोभावो-पदेशास्यादुक्तं श्रीमत्स्वायम्भुवे—

In Public domain. Digitization Muthulakshmi Research Academy

मन्त्रादिवाच्य पदादिवाच्य इति शिवपदम् । शिवतत्त्वमिति

वेदितव्यम् । तथा तत्रैवोपदेशः तद्यथा —

शिवतत्त्वमिदं प्रोक्तं सर्वादिकोपरि संस्थितम् ॥ इति

ननु बिन्दुस्थानां कथं शिवतत्त्वे लयः संभवति । कारणे

हि कार्यलयः न त्वन्यत्र । मन्त्रादीनां कारणं शिवतत्त्व-

मिति समीचीनम् । [illegible] व्योमतत्त्वादीनां

पुनः पाशभावेन चैतन्यात् । न च विरुद्धयोर्द्वयोस्तिरो-

भावाविर्भावौ निमित्तकारणं तथा शक्तेरुपादान-

कारणत्वोपयोगात्तस्मादुपादानकारणशक्त्यादीनां लयो

वक्तव्यः । न तु शिवतत्त्वे निमित्तकारणत्वाविच्छेदे

तत्त्वत्रये त्याहुः । केचिन्नोपादानतयादीनां शिवतत्त्वे

लय उक्तः । अपि तु निमित्ततयैवेति । तदस्यादिव्यपरे

कृते । विशत्येकं शिवपदमित्युक्ते नहि निमित्तकारणे-

१९ ऽन्येषां प्रवेशः संभवति । अथादीनां ह लयः शुद्धिः

सत्यां तत्त्वशुद्धौ दीक्षितः शिवपदं प्राप्नुयादिति शिव-

पदप्राप्त्युपायत्वपरं विशत्येकमिति तदयुक्तम् । दी-

क्षितस्यात्र शिवप्रवेशवचनादेवा विशतीत्यत्रो न-

मुपचारस्तदिच्छेत् । तदप्युक्तं मन्त्रादीना-

दीनां संपदाद्युपादान इव संसारक्रमतो निवेशस्य

वाच्यैकदेशत उक्तेस्तदेकदेशान्तरतोऽप्युपादान इव

निवेशप्रत्यायकत्वान्न च दीक्षितस्यापि शिवनिवेशा-

In Public domain. Digitization Muthulakshmi Research Academy

-यागेन प्राप्तिः अर्थवतो नियत इत्यत्रां निवेशयतीत्य-
र्थे विशेषोपचारः संभवतीति विमुक्ताधिकदी-
प्यायिनः। किमन्यथा तु दीक्षायां शिवव्याप्ति दीक्षायो-
नो योजनाख्यकर्म करणीयं तच्च विमुक्तस्यानुपपन्नं
तत्र तस्योपचार क्रियोजनो नु चेत् सर्वत्रोपचारं वदतः
विनापन्नमिथ्याभिरण्यमोहेन कथं तत्रानिर्वाहः। शिव-
तत्व इत्यो पादाने तत्परिणामस्य भोगसाधनस्य बि-
न्दोराविर्भावः। तस्माद् बिन्दोः शान्त्यतीतादिक्रमेण
कलाध्वन आविर्भावः कलाध्वनः पुनराविर्भूत-
स्तत्वाध्वा ततो भुवनाध्वा ततो वर्णाध्वा ततः पदाध्वा
ततो मन्त्राध्वा इत्येवं सृष्टिक्रमेण विपरीतक्रमः
संहारक्रम इति अध्वनां षण्णां बैन्दवतया तत्रैव
लयो बिन्दोश्च भोगसाधनस्य लयः शिवतत्व इत्येवः
शिवनिर्वाहः। सोऽप्यनुपपन्नं शैवे व्यवहारोऽयं लय-
भोगाधिकाराणां शिवतत्व बिन्दुतत्व सदाशिवतत्वा-
नां सर्वाणि परस्परं कार्यकारणभावोपपन्नानीति
जगदुपादानस्य शिवसाम्येऽव सर्व पाशानां
पूर्णत्वाविर्भावानां लयः स्वपदत्वे स्यात्। तस्मा-
गेत
दृशैव दीक्षायां पूर्णत्वादेह योजन भूमिकात्। तत्र
हि पाशानां लयः मलमायादिकर्मणां विमुक्तं नाम
यदनन्तर विमुक्तपाशस्य दीक्षया शिवत्वाभिव्य-

In Public domain. Digitization Muthulakshmi Research Academy

त्रिरिति शिवशास्त्रे युक्त्यानुकूलता। स चाचार्यः श्रीम-
त्स्वायंभुवे कीर्तितः। श्रीमन्मतङ्गवृत्तौ चोपपादित
इति। तदनुरोधेन नाहं इव सूक्ष्मग्रहणं व्याख्यास्यते।
तत्र श्रुतिमार्गेण शिव पञ्चब्रह्मदेवतानां स्वतन्त्रत्वा-
मेव विशेषः किं व्याप्य व्यापकभाव पारतन्त्र्ये चोक्ते-
ऽपेक्षायां यथा मृगेन्द्रागमे निरूपयिष्यते तथैवार्थानुसारतो-

मृ [मन्त्राः पदानि वर्णाश्च व्याप्तानीह समन्ततः ॥]

निगद व्याख्यानम्। अत्राध्वव्याप्तेः यथा लौकिकः संभवेत्
तथानुकूलतः व्याप्तिमुपदिशन्नाह-

मृ [कलाभिस्तानि तत्त्वानि व्याप्तानीह कलाक्रमात् ॥] ४०॥

मृ [शोधनीया विजानीयात् पञ्च पञ्चादेव गृहीताः ॥] ४१॥

परमव्याप्तिकाः पञ्चानामेव तासां कलास्तेन ताश्च
सोऽध्वा विज्ञेय शोधनीयाः ॥

तदुक्तं चैव तद्गृहीतानां पञ्चानामेव तासां शुद्धिः
संपद्यत इत्युक्तं भवति। अत्र संहार क्रमेण कलाशोध-
नीया इति तदुपवेदनात् सूचयन्नेव तासां क्रमेण
नामधेयानि यथागमवचनान्तर प्राप्तं ज्ञापयति-

मृ [निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च नाम सौ ॥] ४२॥

मृ [कलादिकं शान्त्यन्तं तत्त्वं ब्रह्मान्तं वामकृमात् ॥
निवृत्तौ पार्थिवं तत्त्वं चिन्त्यमेकं क्षमाक्षरम् ।] ४२

मृ [कालाग्निप्रभृतीनां तु पुरमष्टोत्तरं शतम् ॥] इत्यादि ॥ ४३a

सू 21. [भवत्येको गुणः शब्दः कारणं तु सदाशिवः।] 450a

इत्यन्ते पञ्चदश। एवं संहारक्रमेण पञ्चादिवर्गाणां कलां-
व्याप्ति दीक्षाङ्गत्वेनोक्तं भवति। अत्र संहारक्रमेणाऽऽ-
श्रयेण युक्तिः पाशबन्धस्य बहिरङ्गादारभ्य यावदन्तर-
ङ्गं पाशबन्धविश्लेषभावना सौकर्यकृता। तथानेको-
दर्शनात्। तथा हि. वृक्षादौ कुठारादिना छिद्यमाने प्रथमं
त्वगादीनि बहिरङ्गाण्युच्छिद्यन्ते। पश्चात्तु तदन्तर्हित-
सारकाष्ठादीनि। इत्येव मिहापि कर्तुं युक्तम्। अतएवो-
क्तं श्रीमत्स्वायम्भुवे -

अन्तरङ्गतराः शोध्याः बहिरङ्गतरा अपि।
बहिरङ्गेऽपनीते स्यादन्तरङ्गक्रियाक्रमः॥
ऽवमदवादिवत्योक्त उद्धारक्रमयोगतः।
लोके यार्थव्यवस्थेयं दृष्टा वस्तुनिबन्धना॥ इति।

निरूपितयानयरीते तदनयायसततोऽपि संहारक्रमस्य
दीक्षायामङ्गं सृष्टिक्रमाश्रयत्वादुद्धारबन्धनस्य भव-
त्येतदेव। ननु कथं मन्त्रपदवर्णादीनि जडत्वशब्दो-
पपत्तिः। पतिपश्वात्मनोः द्वयोरपि विभुतयाऽस्वरूपगा-
तयोः परिस्पन्दासंभवेन गमनार्थसंभवात्। गमनार्थ-
संभवेन च बद्धबद्धानयस्यादवा योजादिरेव मध्यादव-
सबन्धानस्य न संभवति। नभ्रूपकारादिति तदसंभवः
पाशबन्धशोधनस्य दीक्षाख्यस्य कर्मणः क्रमत्वात्

In Public domain. Digitization Muthulakshmi Research Academy

अस्य च मायादिपाशपरिणयत्वाश्रयत्वे सति तत्परि-
णतेरपि तत्त्वभुवनादिक्रमवत्तयाध्वसादृश्यात्तदि-
22 दमुक्तं श्रीमत्स्वायंभुवे —

पतिं पुंसो विमुक्तेऽपि क्रावेडोऽध्वा तवोर्यथा॥
उच्यते तत्फुंभुवृत्तान अयनं पुरुषस्य तु।
दीक्षाकर्म क्रमेणैतं मया परिणतो यतः॥
सोऽध्वा परिणतिर्यस्माद्देशादिशयनादिनी॥

तदेव मायापरिणते दीक्षाकर्मणश्चाध्वनागमेन च
न च सादृश्यादौ पञ्चारिकमध्वत्वं गमनं चेति नाविमु-
क्तगतिमुक्तयोरत्र विरोधः। अज्ञोऽयं गतिशब्दार्थः
दीक्षानलसंसारबीजतया पुंसस्तु स्वरूपे पवर्ग
गतिरिति। तदुक्तं तत्रैव —

दग्धे संसारबीजस्य या पुंसः पाश्चिमा स्थितिः।
सा गतिस्तस्य विज्ञेया न देशान्तरसंस्थितिः॥ इति।

ननु जातिव्याप्तिवचने शब्दादीनां समासाद्यां
व्याप्तेः पौनरुक्तं दुष्टम्। प्रतिष्ठाव्याप्यलोकेष्वपि ततः
तत्त्वजात चतुर्विंशतेः तत्रैव तन्मात्राणामन्तर्भावान्नैव च
दोषः। तत्त्वभावगुणभावयोः निमित्तभेदात्। प्रकृति-
भावः खलु तत्त्वशब्दे प्रवृत्तिनिमित्तं क्रियाव्यतिकरे
ऽत्रैवाश्रयत्वं गुणशब्दः। प्रवर्तकमिति निमित्तभेदेन
च किं निमित्तभेदाल्लब्धमर्थभेदसिद्धेरित्याशयः।

In Public domain. Digitization Muthulakshmi Research Academy

कार्यकारणभावेनार्थश्चैव विभिन्नत्वात् तन्मात्राणि

कारणं प्रथमादीनां सह पञ्चभूतानां कार्याणि पञ्चभूतानि

सविशेषणानीति कथयन्ति । आनन्तर्यं श्रोतुरनुसन्धेयत्वा-

यां कला व्याप्तौ पौनरुक्त्यं विकल्पितुं कालव्याप्ति-

दीक्षोपयोगित्वमनुसन्धानेनाह—

23. [इत्येवं विविधव्याप्त्या षडध्वव्यापिनीं पराम् ।] ५७॥

[ध्यात्वा शक्तिं तदूर्ध्वं तु भावयेत्परमं पदम् ॥]

दीक्षोपयुक्तो ऽयमुक्तस्य षडध्वनः तद्व्यापकं शिवतत्त्वं शिवस्य परमं पदं कलापरपर्यायं भावयेदिति

सूत्रार्थः । तदेवं षडध्वनो दीक्षोपयोगं उक्त्वा प्रसक्ता-

नन्तरं तदीयानां विविध्योद्देशेन कथयितुमारभते॥

[अथ दीक्षोपयुक्तानां क्रमेणैव षडध्वनां इयत्तया] ५८॥

समुद्देशः कथ्यते ऽत्र विभागशः । क्रमेणैव धारणात् स्वरूपो-

द्देशः क्रमानुरोधेन यत्तया समुद्दिश्यत इति॥

[सद्यो वामस्तथा घोरः पुरुषेशानहृच्छिरः ।] ५९॥

[शिखावर्मास्त्रमूलं च मन्त्रा एवं समुदाहृताः ॥] ६०॥

अथ मन्त्राध्वायः॥

सद्यादिमन्त्राणां कोटयः सन्ति यद्यपि च मन्त्राणा-

मानन्त्यं तथाऽपि तेषां सर्वेषां सद्यादिमूलपर्यन्तैरेका-

दशभिरेव मन्त्रैः व्याप्तिं बोधयित्वा दीक्षायामस्त्वा-

मन्त्राध्वमार्गो ह्येकादशानामेतेषां विलोमत उद्दिष्टानां

In Public domain. Digitization Muthulakshmi Research Academy

इत्येवं पदवर्णभुवनादिष्वपि योज्यम् ।

तेषामसंख्यत्वे व्यापकपददिनैवैवा-
ध्वभावेन दीक्षा कृ. भवा तत्स्वदृष्ट्यैव सर्वमन्त्रपद-
वर्णभुवनादीनां शुद्धत्वप्रसक्तेः । एवं सति व्योमव्यापि-
मन्त्रसम्बन्धीन्येकादश पदान्येव यथा प्रागुक्तवर्ण-
ना विलोमत इव स्वीकर्तव्यानि । यथाष्टकम् ॥

मू [एकाशीतिपदैरेवं पदाध्वा परिकीर्तितः ।] ६०b.

मू [अकारादिक्षकारान्ता वर्णाध्वा समुदाहृतः ॥] ६१a ✓

२५ स्पष्टार्थम् । सुबोधम् । अथ भुवनाध्वोच्यते ॥

मू [कालाग्निरुद्रः कूष्माण्डो हाटको ब्रह्मवैष्णवम् ।] ६२b

मू इत्यादि ॥ [निवृत्याख्यकलायां च ज्ञेयमष्टोत्तरं शतम् ।] इत्य- ७०a
न्तं निगदव्याख्यानम् । प्रतिष्ठाकलाया भुवनान्यु- ✓
मू च्यन्ते । [अमरेशः-
७०a पुष्करे दधीचिरित्यादि] निगदव्याख्यान्येतानि ॥

अथामरेशादीनां श्रीकण्ठान्तं विलोमतो व्याप्तिवादा-
स्य प्रकृतितत्त्वपर्यन्तं आद्यायां विभागं सप्ताष्टकयाता-
न्तदर्शने च प्रतिष्ठाकलाव्याप्तिमुपसंहरति- ✓

मू [अमरेशादिचाप्तत्वे हरिश्चन्द्रादि तैजसे ।] ६४b

मू [गयादि वायुतत्त्वे च व्योम्नि वस्त्रापदादि च ॥ ६५
छगलण्डाद्यहङ्कारे पैशाचान्तं मनस्यतः ।]

मू [प्रकृताविकृताद्येवं भद्रकर्णादिपुराणि तु ॥] ६६a

In Public domain. Digitization Muthulakshmi Research Academy

मू [ज्ञातव्यानि प्रतिष्ठायां अमरेशादिनामभिः ॥] 86 b

अथ विद्याकला व्याप्तिमधिकृत्य भुवनान्याह —

मू [वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः ॥] इत्यादि 87 a

मू [वामादीनां पुराणान्तु विद्यायां सप्तविंशतिः ॥] 92 a

अथ शान्तिकला व्याप्तिमधिकृत्य भुवनान्युच्यन्ते —

मू [निवृत्त्यादि व्यतीतायां पुराणि दशपञ्च च ॥] 96 a

अथो अनन्तोक्त वर्णना समस्तानामपि भुवनानां महा-

संख्यां निगमयति —

मू [एवं पञ्च कला वर्ति भुवनानां शतद्वयम् ॥] 96 b

मू [चतुर्विंशोत्तरं यत्तु भुवनानीति वर्णितम् ॥] 98 a

(ना)

25· भुवनानि नैव तावन्ति अपि तु तेभ्यो व्यतिरिक्तान्यपि

दिव्यागमोपदिष्टानि विद्यन्त एव । तथापि दीक्षायाः

सौकर्यार्थं तेभ्योऽस्माभि निरूपितान्येतावन्ति

यानि पुरतो व्यतिरिक्तानि शिवागमेषूक्तानि तेषा-

मेष्वन्तर्भावः ऊहनीय इति तात्पर्यार्थः ।

ननु कला पञ्चक व्याप्तिका उक्ताः । मन्त्रपदवर्ण-

भुवनादीनां भवत्य शीघ्रत्वार्थं भुवनादौ पुनः पदव्या-

प्तिरितराध्वनां व्यज्यत इति नियमः । तत्र वास्तव

तत्त्व मार्गमार्गस्य भवतीति वस्तुनो विकल्पासहत्वा-

न्नैव दोषः । दीक्षा विकल्पे ...... इत्यादिभिः दिव्या-

गमेषु दीक्षासमाज्ञा नीयते अपि तु तत्त्वभुवनाध्वपदा-

तत्त्वाश्रिताऽपि तथैवमपि वस्तु विकल्पादि वृत्तिः

वस्तु व्याप्तेरैक्यैक वृत्त्यादि इति चेत्, सत्यम्। वास्तवी

व्याप्तेरैक्य सा शक्तितत्त्वात्मिका न समस्ताध्व पुरव-

वाच्छक्तितत्त्व शिवतत्त्वयोरध्वसु पुनः षट्सु तद्व्या-

...... वास्तव सा व्याप्ति भेदोऽपि निवस्तुवृत्तिं

रूपा हि। कूटस्था वा ऽयं व्याप्तेरध्वसु निवृत्तेः कि-

न्नवस्त्वन्तावन्न धारणीयम्। किञ्च ध्वनामपि व्या-

प्य व्यापक भावाऽभ्युपगमे कलाध्वन ऽयं व्याप्त्या

सर्वाध्व दीक्षा स्वयं ध्वानि पर्यन्तं स्थैयोऽङ्गीकर-

णीय इति कलाभ्यो व्यतिरेकेण सदाशिवादि

पञ्च ...... रूपाधिष्ठानाभावात्। ...... श्रीम-

त्स्वायंभुवेऽप्यध्व व्याप्तौ व्योम व्यापि पदावच्छेदे

नोच्यमानायामपि सर्वां कलाभिरेव पञ्चभिः पदानां

व्यूहः पञ्चधावच्छिद्यते। कलानामेव साक्षाद्व्यव-

च्छेद कला यथोक्तमध्व व्यापि पदस्थले ओंकारात्म-

तया भवति शान्त्यतीतः परः शिवः प्रथमावच्छेदार्थ-

26 क्षितिर्यावच्छेदाय पुनः व्योमव्यापि पदस्थेषु पञ्च

मन्त्र ...... मन्त्रसंज्ञोऽध्वनाम व्यूहोरस्यादिकः व्यो-

मादिरन्त पर्यन्ते सप्ताक्षर पदे स्थितः। इति तृतीयाव-

च्छेदार्थं तु" ओंकारादि शिवान्तं पदपञ्चकलं

क्षितम्। विद्यातत्त्वं ततो विद्याधिपाध्वादौ व्यवस्थितम्"

In Public domain. Digitization Muthulakshmi Research Academy

विद्या तत्त्वं ततो विद्या द्विधा एवादौ व्यवस्थितम्।

इति यत्तु शिवच्छेदे पञ्चभावच्छेदाव बोद्धव्यं तेषा-

मादना प्रतिष्ठाया इना प्रतिष्ठाया द्वात्रिंशत्पदस्थितिः

निवृत्तेरपर ...... वंप्रकीर्तित इति। व्याख्यातस्तैतद-

स्माभिः सर्वं तत्त्वमीश स्वायंभुवे वेदित एव द्रष्टव्यम्।

तस्माद्वरुण गुरुरपि कलाभिरेवाध्वानं व्याप्तिमुपदिश्य

(यथा समवृत्तं वर्णयति इति सिद्धं भुवनेयत्तादिदं स्वे

मू यत्तमाह – [अथ तत्त्वानि षट्त्रिंशत् पृथिव्यप्तेजो मरुद्वियत्॥] १८ ...

इत्यादि निगदव्याख्यानमेतत्॥

मू अथ कलाध्वनि इयन्तो। [...... प्रतिष्ठा च विद्या २०

शान्तिस्तथापरा। अतीतेति कला] पञ्च दीक्षा बीजमक-

रणमुपसंहरति॥

समुद्देशलक्षणानां इत्येवं लक्षणानां उद्देशः शिवदी-

क्षा बीजावगतये स्माभिः कृत इत्युपसंहारस्य तात्पर्यार्थः।

॥ इति भट्ट शिवोत्तम कृतौ वरुणपद्धति वृत्तौ आद्यं प्रकरणम्॥

अथ यथाप्रतिज्ञात कर्म ......

बीजकं निदर्शयितुकामः प्रथमं प्रधानबीजमाह –

मू (ज्ञानशक्त्या मेकोलिङ्गं क्रियाशक्तेः समर्पणम्।

मू [पीठस्य विधिना योगः प्रतिष्ठा] संग्रहेणोक्तेति वाक्य-

27\. शेषः। अनेन शिवस्य शक्तिः देहमधिष्ठानमपरं पर्यायं

In Public domain. Digitization Muthulakshmi Research Academy

हृदि कृत्य तदेवाधिष्ठाना मूर्तिभूतं ज्ञानशक्त्यात्मना
च निर्दिष्टं । तत्र लिङ्गं ज्ञानशक्त्यात्मकं पीठं क्रियाशक्त्या-
त्मकं ... यथा नेत्रोदिते शिवार्चने शिवशास्त्रोक्तेन
वर्त्मना गुणप्रधानभावेन क्रियमाणं संयोजनं संग्रहात्प्रति-
ष्ठाशब्दस्यार्थ इत्युक्तं भवति । तथाहि शिवः साक्षात्स्वयं
चिद्घनत्वात् स्वसंवेदनतया परया संविल्लक्षणया ज्ञानशक्त्यैव
स्वतोऽवस्थानं जानाति । तत्तया प्रयोजनस्यार्थे कर्तृकारक-
तया शास्त्रोपपत्ति यथा मानोगम्ये तावत्प्रोक्तं । अथ पर्यु-
पाधिष्ठानं स्वशक्तिकारणात्मकमिति । स नाम मधिष्ठा-
नाद्योऽस्माभिः श्रीमन्मतङ्गवृत्तावेव समर्थित इति नेह प्रतन्यते

यस्मात्सा च शक्तिः करणात्मिका मधिष्ठानात्मकं
शिवस्यात्मनो यस्य तस्माद् ज्ञानशक्तिरेवास्य मूर्तीति
शास्त्रेषूच्यते । आत्मोपलब्धिकत्वात् लोके मूर्तिशब्दार्थः
... स्य आत्मा स्वतः मूर्त्युपलब्ध्यो यथा देवदत्त इति ।
शिवे पुनरजस्य तादृशस्य मूर्तिशब्दार्थस्य घटनात्मक
त्वात् तदुपलब्ध्येत्वासंभवे तत्समर्थाय ज्ञानात्मिका शक्ति
रेव प्रथममुपलब्धयत्नं यातीति मूर्तिरूपतारस्य निमित्तं
शिवमूर्तित्वेन च लिङ्गस्यैव प्रतिष्ठा क्रियत इति । ज्ञान
शक्त्यात्मकमायाधारतया प्रतिरूपकत्वाच्छिवस्य कर्तृत्वं
ज्ञानाधारतयेति ज्ञानशक्तिरेव तस्य कर्तृत्वं प्रतिपादयति
तद्वस्थायां क्रियाशक्त्युपचर्यते । क्रियागर्भत्वाल्लोके

कर्तृत्वार्थस्य स्वतन्त्रस्य च कर्तृत्वमिति स्वातन्त्र्य-
प्रतिपादके स्थाने यादि भवितव्यम् । स्वेच्छालक्षणत्वात्

28. स्वतन्त्रस्य च शिवस्याव्याहतकामतया न गुरव्येच्छा-
योग इति ज्ञानशक्तिरेवोक्ता पाधिना शिवेच्छेत्युपचर्यते ।
तस्मात् ज्ञानशक्तिवत्स्वात्मसिकस्य च क्रियाशक्तित्वं पुन-
स्तद्वत्तया कलामिति बहिरङ्गत्वस्य सिद्धिः । यद्वेदं
बहिरङ्गत्वं तदेव क्रियाशक्तेः पीठत्वे उपरि निमित्तं
तदाभिप्रेत्योक्तम् –

ज्ञानशक्त्यात्मकं लिङ्गं क्रियाशक्तिः समर्पणम् इति ।
तस्यैव विवरणं पीठस्य विधिना योग इति यथाशास्त्रम-
नुष्ठानं विधिशब्दार्थः । अत इदमत्र समर्थितं भवति ।
शक्तित्रयास्पदं विश्वमिदं क्रियत इति । तद्व्यापकत्वा-
दारम्भ(सम) शब्दार्थस्य तस्य नारम्भार्थं व्यापकत्वादभि-
मतमभिप्रेत्योक्तं नित्यशक्तित्रयोन्मेषकृत्स्नत्राज्जगा-
नां जयत्यवार्क विभवप्रभवः । प्रभुरीश्वर इति चेय-
मुक्तलक्षणप्रतिष्ठा तस्या नानात्वं तस्याः पञ्चविधत्वम्
प्र स्थापयति । सा च पञ्चधा ॥ २

प्र [प्रतिष्ठा स्थापनं चैव स्थितस्थापनमेव च ।
उत्थापनं च संप्रोक्तं तथास्थापनमित्यपि ॥] २

निम्नक्रमेण पञ्चानां विभज्य व्यवस्थानलक्षणमाह –

प्र [लिङ्गं ब्रह्मशिलायोस्य पूर्वके योन्यापिण्डिके ।] २०

[बाणादयः स्थलचक्रपीठे नीचैर्न्यसेद्यथाक्रमम् ।] ३८ ॥

यत्र लिङ्गं कृष्णशिलान्यासं पुरस्कृत्य प्रतिष्ठा क्रियते
तत्र न्यसनादौ क्रियमाणस्य प्रतिष्ठा प्रतिष्ठेत्येव संज्ञा भवति ।
यत्र पुनराधेय पिण्डिकामात्रं तदाधेय पिण्डिकां
लिङ्गं तत्र बाणादि लोहरत्नमयं तस्मात् बाणादौ
29. क्रियमाणप्रतिष्ठाकर्म स्थितस्थापनसंज्ञितं भवति । नी-
चैर्हृतिरुत्थापनं पूर्वं पीठमास्थाय तस्मिन्नुत्तलिङ्गस्य
निवेशनमास्थापनसंज्ञकं भवतीति सूत्रार्थः । प्रथमं
प्रतिष्ठारम्भस्य कर्मणः संज्ञालक्षणाभ्यां प्रकाशवितं
दर्शयित्वानन्तरं प्रतिष्ठितस्य कर्मणः शास्त्रान्तरानुरोधेन
वैकल्पिकलक्षणान्तरमाह —

मू [मूर्तिमूर्तीशविन्यासः तत्त्वतत्त्वेश्वरान्वितः ।
अष्टधा पञ्चधा यत्र प्रतिष्ठा सा विधिः भावितः ॥] ४ ॥

मूर्तयोऽष्टौ पृथिव्यादीनि पञ्चभूतानि सूर्यचन्द्र-
मसौ यजमानश्च मूर्तीशाः । पुनः शर्वभवरुद्रोग्रभ-
हीमाः पञ्चभूतेषु यजमाने पशुपतिश्चन्द्रमसि महा-
देवस्सूर्ये ईशान इत्यष्टौ मूर्तीशाः इति केचिद्व्या-
चख्युः मूर्तिमूर्त्योर्विनियोग .... मनेन क्रमान्तरं
वक्ष्यति । तत्रैव व्याकरिष्यते । एवं सत्येवं सूत्रार्थः ।
यत्र प्रतिष्ठाकर्मणि मूर्तिमूर्तीशविन्यासोऽष्टधा
क्रियते यत्र वा मूर्तिमूर्तीशविन्यासमुत्सृज्य वक्ष्यमाण-

सूत्र निर्दिष्टानां तत्त्वानां तत्त्वेश्वराणां च पञ्चानां तुर्य आधीयते । ततो यजमान क्रियमाणमेव प्रतिष्ठाकर्म प्रतिष्ठासंज्ञकं नान्यदिति । अथ लिङ्गोद्धारमधिकृत्य तद्विकल्पयन्नेतदुपक्रमते –

रुद्रभागो त्रिधा भक्ते ब्रह्मरेखानुसारतः ।
अर्धो भाग द्वये लक्ष्म लक्षणं चिह्नमित्यर्थः । सुयोजनमन्यत् । किन्तु कस्यैवं चिह्नमित्येव वारणीयम् । यतो बहुधा शास्त्रेषूक्तमस्तावन्मात्स्यपुराणे पुराणदानाध्याये श्लोको लैङ्गस्योपलक्षिता ।

30. यत्राग्निलिङ्गमध्यस्थ प्राह देवो महेश्वरः ।

तल्लिङ्गमिति – तदनुसारेण विद्याकलायां लिङ्गमित्याख्यात तेजसां घटस्यान्तस्था भागो घटा व्यापकतया तस्यामेव विश्वस्य मायोपादानस्य लयनाल्लिङ्गमुच्यत इति इह शास्त्रोपपादने लिङ्गशब्दस्य

अन्ये त्वाहुः – अग्नितां लिङ्गमिति यस्मादुक्तं श्रीमल्लिङ्गपुराणे –

आलिङ्गो लिङ्गमूलन्तु चाग्नितां लिङ्गमुच्यते ।
तल्लिङ्गं शिव इत्युक्तो लिङ्गं शैवामिति ~~स्थलम्~~ स्थितम् ॥

अस्य च मूलश्रुतिर्यथा –

शिवलिङ्गस्ततो स्थाणुरव्यक्तो भगवान्महेश
शिवस्सदा सत्परव्योम नित्योदिताः । अपरे पुनः इतामेव श्रुतिमवलम्ब्य परमव्योमिकां शान्त्यतीतकलामेवेदं लिङ्ग-

In Public domain. Digitization Muthulakshmi Research Academy

इति । तथोक्तं च पुराणान्तरे:—

आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका । इति

अपरे पुनराहुः सर्वमिदमुक्तं स्थूललिङ्गप्रायमिति

यस्मादुक्तं श्रीमत्कर्मशास्त्रे—

लिङ्गमध्ये परं लिङ्गं स्थितं प्रादेशसंस्थितम् ।

समाधौ स्तोत्रसम्पन्नो हृदि .. नतौ शिलात्मिकम् ।

नैव तत्काञ्चनं रत्नं ताम्रं स्फाटिकमौक्तिकम् ।

हृदयमात्रस्थितं ध्यानं केवलं तच्चिदात्मकम् ॥ इति

तदेव लक्षणमुद्धार्यमाणं तस्यैव लक्षणमिति चिन्त्यम् ।

तत्र परमशिवस्यैतदनुपलक्षणमिति केचित् । तदयुक्तम् ।

शिवस्योपरमस्य लिङ्गतया शिवलिङ्गोपरि पूजनीयात् ।

परलिङ्गत्वाल्लक्षणान्तरस्योद्ध्रियमाणस्यापेक्ष्यैवं तर्हि

३। ज्ञानशक्तिरेव तल्लक्षणमस्तु । तदभावादसुजाग्रपरापर-

लिङ्गयोरपि शिवमूर्तिप्रतिरूपकतया ज्ञानशक्त्योरे-

कत्वाविशेषाधः स्थानेऽपि मूर्तिमूर्तमङ्गीक्रियते । तत्र

सर्वज्ञः शक्त्यात्मकमेवेति । ततोऽप्यतिरिक्तमेव तस्यापरि-

लिङ्गमिहोपपादनीयं तत्राहुः । केचित् यतः इदं जगत्

जडरूपमायाविषयं निरोधयति तत्परनादात्मकं परबिन्दुं

परपर्यायं तदेव लिङ्गमध्यस्थं परलिङ्गमिति । तत्रो-

-द्धृतमपरे—

अथ तानुद्भवश्छिन्दः कारणादक्षरं ततः ॥ इति

In Public domain. Digitization Muthulakshmi Research Academy

भोगस्वार्थं भुङ्क्ते उक्तं। तस्मात्परा व्युत्पत्तिश्रवणात्
कार्यं चानु तस्याद्वा मूढः तन्निरेणैव समस्तादवक्तुरनेन
भवितव्यम्। यस्मिन् सति जिज्ञासा नोपलक्षणं स्यादिति
तत्र बिन्दूपादानवादिन आहुः। बिन्दुशक्तिशिवेभ्यो
नाद्यं कारणमिति कार्यस्य विश्वस्य शिवो निमित्तका-
रणमेव नोपादानं चिद्घनात्मकतया तस्य प्रकृतिभाव-
भावाच्छक्तिः पुनः उपादानस्य क्षोभकतया समवायि
विकारं तु यामलं तं। अतः पारिशेष्यान्निमित्तकारणं
इति कार्यस्य विश्वस्य तत्र शिवो इति निमित्तकारणत्वाभ्यु-
पगतः पारिशेष्यात्कारणकोट्यन्तर्भूत इव सत्यपि
समवायिकारणता प्रतिपाद्यते ततः पारिशेष्याद्बिन्दुरे-
वोपादानं विश्वस्य तस्यैव लक्षणं च प्रकृतत्वेनाङ्गीक-
रणीयम्। ततश्च विशिष्टनिरूपणाभावान्न संभवतीति।
येन पुनः शब्दः तस्यापि नित्यत्वं न सहन्ते। व्याप्तिव-
त्तित्वेन प्राकृतानामनुपपद्यमानत्वात्। तत एवाहुः। न ताव-
च्छिवशक्तिरिति ... इत्यत्र सर्वस्य

32. पञ्चमः। अपि तु स्वात्मस्थ शिवतत्त्वकारणं वस्तु
ननु शिव इव तत्त्व स्वात्मनैक्य विङ्गाङ्गिकयमावो उपादानत्व-
प्रसङ्गाच्चेत्तु शिवोपादानं जगदिति सैद्धान्तिकशि-
रोमणिनामनुपपन्ना तस्मात् स्वात्मरूपमेवात्र लिङ्ग-
महतो परिलिङ्गमित्यभिधीयते। तदुपलक्षणमेदं

इदानीं मुद्रार्थं लक्षणमिति सम्यक् तत्त्वविदः।

अथ लक्षणस्य क्रियमाणस्य विस्तारं रेखाः

. . . . दर्शयति।

मू

लिङ्गायामे जिनांशे तु (लक्ष्म) लक्ष्मविस्तृतिरंशतः।
पृष्ठे निम्ना च तद्रेखा विस्तृते नवमांशतः॥ ६॥

लिङ्गशब्देन रुद्रभागः कृत उच्यते तस्य लिङ्गायामो दैर्घ्यं तस्यांशेषु जिनसंख्याविभक्ते। अत उक्तं जिनांशेति मुक्तं भवति। मध्यदेशमङ्गलं लक्षणस्य सरेखस्य विस्तारमानं स्वीकुर्यात् यावत्कांशो लक्ष्मविस्तार मानेन . . . . पुनर्नवधा विभज्य एकेनांशेन समाविस्तार निम्ना च यथा भवति तथा लक्ष्मरेखा कर्तव्येति सूत्रार्थः। अथ पदसूत्रस्य निदर्शयति —

मू

लक्ष्म रेखा पद्मरेखे द्वे तत्क्षेत्रे स्वाङ्गभाजिते।
षट्सप्तांशक्रमात्क्षिप्ते तयोगो विवर्जनात्॥ ७॥

लक्ष्मसूत्रा(या) स्थ्य पद्मसरेखा द्वे सूत्रक्रमेण कर्तव्येति

33 सूत्रार्थः। सूत्रक्रमेण . . . . . . यत्क्षेत्रं तस्मिन्नष्टधा भक्ते सति भागद्वयमध्ये वर्जयित्वा भागषट्कं मध्ये कृत्वा तत्क्षेत्रे सप्तमांशेन सूत्रार्थेनार्धचन्द्रे च कृष्णे शालता लिङ्गप्रतिष्ठे तयो रेखयोः संयोगो भवतीत्युक्तं भवति। तदेव समस्तलिङ्गसाधारणरेखायां क्रमं दर्शयित्वाऽधुना प्रकारान्तरेण तल्लक्ष्मणं दर्शयति —

In Public domain. Digitization Muthulakshmi Research Academy

मू वाक्यभेदेऽपि तद्योगे ...... 8॥
धूमसन्ततिभूयस्त्वं भवेद्भागार्धवर्जनात् ॥

यत्प्रागुक्तं क्षेत्रं तस्मिन्न निर्विभागे विभक्ते सत्यपि विशेषः।

अथो दर्श भागं स्थापयित्वा तदुपरि अवशिष्टं सार्ध-
भागद्वयं पञ्चरेखाक्रमणाय कल्पयेत्। किमर्थमिदं धूमस-
न्ततिभूयस्त्वं पञ्चरेखाक्रमणे कृते प्रागुक्तमाविश्यते
पञ्चसन्तानस्य क्रमः स्यादिति। उत ...... पञ्चरेखा-
क्रमणार्थं कृते तु धूमलक्षणमुद्दिश्यमानः कर्तुः सन्तति-
भूयस्त्वं भवेदिति। तदसत्। अनन्तरं सूत्रपाठाभ्यस्त-
त्वात्। तद्योगवशं विधीयते तदिदं साधारणं विधायि-
तत्कृत्यभेदे तदन्यथा प्रकारद्वयमप्युक्तं समस्तानि कृ-
कारणविशेषेऽपि। तस्यात्कार्येऽपि कृत्यभेदे तु तदेवान्यथा-
कर्तव्यमिति। तथा

41.0, ... प्रतिष्ठां विधायकवाक्यं सिद्धं तत्र तादृह
दर्शनीयं प्रतिष्ठा बीजमात्रस्यास्माभिः वक्तव्यत्वादिति।
अथवा सार्धभागद्वयतः पञ्चरेखाविकारभेदे-
कारे स्यात्। अत एवोक्तं पिङ्गलमते लक्षणार्थगुण-
वशात् भागद्वयस्य तु। सार्धतस्सूत्रं लक्षणभोग-
मोक्षार्थं निरुक्तमिति। तस्मात्साधारणविधावेतदिति मू
34. सूत्रमन्यशेषपञ्चकम्। भोगमोक्षयोः साधारणको-
ट्याविशेषात् कृत्यभेदे इत्युक्ते भोगिनामादिविषयवाक्य

अथ तादि लिङ्गेषु लक्षणोद्धारं दर्शयितुं इदानीं

प्रथम मुखलिङ्गादौ लक्षणं स्थापयति -

[नयनोन्मीलनं व्यक्ते व्यक्ताव्यक्ते तथैव लक्षणम् ।] १८

व्यक्ते प्रतिमादि व्यक्ताव्यक्ते तु मुखलिङ्गे सुबोधमन्यत् ।

अथ लक्षणस्थानानि विषय भेदमाह -

[न बाणादौ चले तत्र न लोहे नालिकेरके ।] २०

लक्षणोद्धारणं कार्यं इति वाक्यशेषः । पीठे विलक्षणं दर्शयति -

[रन्ध्र मध्ये भगाकारं ऊर्ध्वांगे लक्षम पीठकम् ।] २०

सुयोजनमेतत् । किञ्चित्तन्दूलस्य इदय रेखाकरणामि-

त्या[रन्ध्रस्यैव त्रिभागेन तन्दूल ... क्रमे रेखयेत् ।] २२

लिङ्ग लक्षणे त्रिधाभवत्योत्तरं भागोऽपि प्रथममवस्थाय

अधस्ततः एव भागद्वये भगाकारस्य मूलं यथा भवति

तथा हस्तं परिज्ञाय लिङ्गलक्षणरेखा जुरकविस्तारगां-

भीर्याणि भगरेखा गुह्ये करणीयामित्युक्तं भवति । तस्मा-

दुक्तं लिङ्गलामते -

उत्कीर्य लक्षणं तस्या भगाकारं तु रन्ध्रकम् ।

यथा न दृश्यते लोकैः गुह्यं शक्तिमतो परम् ॥

इति लिङ्गलिपिकयोरङ्कुरलक्षणयो मधुघृतादिभिः

आसेचनादारभ्य पञ्चगव्यमूर्ति कुम्भकलशार्चना

क्षीर दधि इक्षूदकैः स्नपनम् । पूजा नीराजन रथया-

त्रा निद्राशयन कुम्भन्यासादिकं च यथाक्रमेणोपदिशति -

In Public domain. Digitization Muthulakshmi Research Academy

कारोक्तं कृत्वा यथा वक्ष्यमाणं मुमुक्षुसाधककर्म्या-

35 ध्वाकारानुसरणं लिङ्गपीठशिलासु मूर्तिशक्त्यादिवि-

न्यासानन्तरं कर्तव्यमाह –

मू [लिङ्गपीठशिलानां च व्याप्तिस्तत्त्वादितः क्रमात् ।] २२b

मू [शिवशक्तिसदेशान्ता] निवृत्त्यादीति वाक्यशेषः ।

तत्र लिङ्गेन पीठस्य पीठेन शिलाया व्याप्तिस्तत्त्वक्रमेण

भावनीया । तदनन्तरं सृष्टिक्रमात् तत्त्वादित आरभ्य

लिङ्गपीठस्य शिलानां यथासंख्यं शिवशक्तेः शक्तितत्त्वेन

सदाशिवतत्त्वेन व्याप्तिरनुसन्धेयेति । ततः परं तत्त्वैव

लिङ्गं । त्रिवृत्यैवं संहारक्रमात् त्रिखण्डपरिकल्पनं

व्याप्तिबुद्धिं च कर्तुमाह –

[त्रिखण्डं कल्पयेत्पुनः ।] मू २२a

[विद्याशक्तिशिवप्रान्तं मायासादेशशक्तिकम् ।] २२b

[शब्दं चित्तं सदेशान्तं लिङ्गपीठेऽश्मनि क्रमात् ॥] २३a

प्रत्येकं भवति । लिङ्गमध्यस्थात् शुद्धविद्यामयं मध्ये

शक्तिमयं प्रान्ते शिवमयमित्येवं व्याप्यव्यापकतया गर्भे

त्रिखण्डं भावयेत् तथा पीठमध्यस्था मायामयं मध्ये सदा-

शिवात्मकमन्ते शक्तितत्त्वात्मकमित्येवं त्रिखण्डं व्याप्तिं

कल्पयेत् तथा श्मनि शिलायामधस्तात् पृथिव्यादि

शब्द~~तन्~~तन्मात्रान्तं मध्ये कर्मेन्द्रियादि बुद्ध्यन्तमन्ते

गुणतत्त्वादि सदाशिवात्मकमित्येवं त्रिखण्डव्याप्ता परि-

In Public domain. Digitization Muthulakshmi Research Academy

कलशयोरिति प्रसङ्गात्। प्रासादे हृत्कुम्भप्रतिष्ठापो-

जलेनाध्वव्याप्तिं त्रिखण्डपरिकल्पनाञ्च दर्शयति

मू [यथा तत्वान्तिका व्याप्तिः हृत्कुम्भस्य प्रकीर्तिता।] २४८

मू [त्रिखण्डाध्वा पुनर्विज्ञ कलामायावसानकम्॥] २४९

36. प्राङ्न्यासेन सुयोजनमेतत्। हृत्कुम्भेऽस्मिन्मूर्तिभूते

न्यासनीये रत्नौषध्यादिकमन्यच्च तस्मिन्कल्पनीयम्।

अथ यो हृत्कुम्भेन मूर्तिभूते सति मूर्तिमत्त्वेना-

बाह्य प्रासादनामा पुरुषः तस्याध्वव्याप्तिं त्रिखण्डेन ज्ञा-

मू पयति [पुरुषस्य त्रिकखण्डत्वं शब्दश्चोपुरुषावधि] २५०

प्राङ्न्यासेन सुयोजनमेतत्। हृत्कुम्भस्य मूर्तित्वं प्रत्य-

यकालस्य विधानेन तन्मूर्तिधारा युक्तियां वदाम्।

यस्मादुक्तं पिङ्गलमते —

समाचाराने तत्त्वं च घट वर्णानि वेशयेत्।

सर्वभूतात्मकृतिस्थं व्यापकञ्च विदीश्वरम्॥

तत्कर्मान्कु तद्वासेनां अधिकारमलान्वितम्।

नियत्यादि कला माया राग विद्या समन्वितः॥

माया प्रसूति संसक्तं इयत्त्वेवन्तु निरोधयेत्॥

इति। यौक्तिकमेतत्। प्रासादस्यापि लिङ्गवाच्छिन्नमूर्ति-

विशेषत्वात् छिन्न मूर्तेर्नास्याधिकार मलान्वितावि-

शेषविहिताया शिवं प्रति मूर्तिभावः साक्षादिति श्री-

मन्मतङ्गटीकायां भुवनादिव्याख्यानेषु प्रतिपादितमित्युक्तं

प्रसङ्गेन।

In Public domain. Digitization Muthulakshmi Research Academy

अथ हृत्कुम्भप्रसङ्गे निवृत्ताप्रसङ्गेन द्वारादि प्रति-

ष्ठाबोधभूतां व्याप्तिं दर्शयति-

मू [द्वारप्रासादचूडानां व्याप्तिर्लिङ्गे च दर्शिता।] २५a

प्रसङ्गात् कुम्भस्थं लिङ्गप्रकरणे च व्याप्त्यनन्तरमुपादिशति।

मू [कविभवेशान्ते च तत्र न्यसेत् तत्त्वत्रयं क्रमात्।] २५b

मू ३१. [स्वस्वतत्त्वाधिपैर्युतमात्मविद्याशिवात्मकम्॥] २६a

को ब्रह्मा विभवेशानामष्टानामयो लिङ्गे तत्त्वत्रये पदार्थैक

वचनेन सप्तम्या निर्दिष्टं तत्र देवं निर्दिष्टानुरोधेनात्म-

तत्त्वविद्यातत्त्वशिवतत्त्वात्मकं तत्त्वत्रयं मूर्तिभूत स्वस्वत-

त्त्वाधिपैः ब्रह्मविष्णुरुद्ररूपैर्युतं तथा तत्त्वव्याप्तिभाव्य

प्रयोगमित्युक्तवर्त्मना विधानेन स्पर्शहोमान्तमन्ते

न्यसेदिति सूत्रार्थः। तत्त्वात्मविद्याशिवात्मकमिदं तत्त्व-

त्रितयं शक्तित्रयाधिष्ठानकमिति सिद्धान्तशास्त्रेषु

शैवं समस्तकार्यव्यापकं च जगन्निवर्तकमुक्तरूपम्।

ब्रह्मविष्णुरुद्रास्तु सकलात्मकपशुत्वात् विद्यया-

तापि वृत्तिषु सर्गस्थित्यन्तकर्मकारितया पत्याज्ञ-

स्वाधिकारपर्यवसाने यथा स्वकर्मविपाकं पुनरवि-

बद्धा मुक्ताः प्रस्फुरतः शक्तित्रयापेक्षानुरूपाः प्रति

परिवृत्ति ब्रह्मादीनां परिवृत्तरेवतो कथमेव त्रितत्त्व

त्रयाधिपत्यमुपपद्यते। नैष दोषः। सदाशिवादित्वादि

उक्तार्थस्याविद्यमानत्वात्। तेऽपि शिवस्य मूर्त्यधिष्ठानेन:

In Public domain. Digitization Muthulakshmi Research Academy

स्वाधिकार पर्यवसाने मुच्यन्ते। इतरेऽपि मुक्तेषु

संसारानुच्छेदं परिवृत्यन्तरे सदाशिवान्तमीश्वराज्ञा

प्रवर्तत इति। तन्नाऽयं समान उत्कर्षापकर्षपर्यनुयोगः।

अथास्तेव तेषां तथापि अनुपपत्तिः तद वस्थेति चेन्ना

तादवस्थ्यं तस्या ईश्वराज्ञाविधानस्यैव तादृश-

वादाशैवं स्वतन्त्रेश्वरस्य भुक्तिमुक्ति व्यवस्थापनात्।

कथमीदृग्दोषाय घटते किन्त्वाश्चलोके वद्भुतरम्॥

38\. तथा हि- पुर ग्राम जनपदादीनां राजैवाधिपतिः साक्षात्

तथापि ते तदाज्ञया तन्मात्रनियोगिभिरधिष्ठीयते। किञ्चित्कालं

कान्तारे पुनस्तमन्यमेरेति इत्थमेवास्मानिः। एवं

शिवस्यैव शक्तिनायकत्वमेव स्वस्वमस्तानिवर्तयति।

ब्रह्मादयस्तु परिमितकाला स्तस्याधिपत्यं कुर्वत इति

नाऽनुपपन्नं किञ्चित्।

अथ मूर्तिमूर्तीश विन्यासव्यवस्थाविशेषं ज्ञाप-

यन्नाह-

मू अर्कवायवानलयज्ञा मूर्तयोऽपि यथाक्रमम्। २६

मू ब्रह्म विष्णु हरा इव लिङ्ग नव नाधिपाः॥ २७

धरा वह्नि यजमानार्क जल वायु निशाकराः।

मू व्योमान्ता मूर्तयश्चाष्टौ व्यस्तयाः प्रतिपादिकाः॥ २८

शर्वः पशुपतिश्चोग्रो रुद्रश्चैव भवस्तथा।

मू ईशानश्च महादेवो भीमश्चेत्यष्ट मूर्तिपाः॥ २९

In Public domain. Digitization Muthulakshmi Research Academy

लिङ्ग. मित्युपलक्षणम् । पिण्डिकाशिलयोरपि तत्त्वत्रयं

त्वैतदधिपादिन्यासस्य वक्ष्यमाणत्वात् । अतएवोक्तं

पिङ्गलामते - लिङ्ग. भागेषु तत्त्व त्रय व्याप्त्या ब्रह्मरुद्रेश

रुद्रादीश स्पर्शयुक्ता नान्तरं तथा पीठ क्रियां व्याप्त्या

शोध्य मूर्तिसमन्वितं सा क्रियाख्या विधिः सोऽत्र

किन्तु भोग्यत्व कल्पित भोक्तृत्वेन परो नाथो ज्ञानशक्त्या-

त्मको विभुरिति । तथा तत्रैव ब्रह्मा क्ता पिण्डिकायां साध्व-

साकारिणी स्थिता । सर्वैक मूर्ति तत्त्वानां तास्म समयोगि-

रोचयेत् । रुद्र तृतीये पूर्वा वा ब्रह्मा विष्णु हराक्रमा ॥

37. ज्ञाने रुद्राणां यथासंख्यं मेकैकखण्डस्य व्यवस्थिता ? ।

भवे यद्यमादि मूर्तयः शर्वादि मूर्तिपाश्चाष्टौ पुनश्च जघन्ये

स्तव्या इत्येकोऽपि इयं विशेषः निशोबान्तरस्यूक्तं अष्टौ

वेत्रादिना सूत्रेण द्रवीभिहिताः । मूर्ति मूर्तीश विन्यासश्च-

वश्यो पञ्चविधो वा । तत्र वश्यो मूर्तिव्याख्याता पञ्चवि-

धस्तु भूत पञ्चकानि वृत्तिकला पञ्चक विन्यासतो ब्रह्मादि

कारणेश्वर सदाशिवादि ब्रह्मपञ्चक विन्यासतश्चेति सूत्रं

पूर्वं व्याख्यास्यते । मूर्तयोऽष्टौ यथा निर्दिष्टा तथा क्रमेण

मूर्त्यधिपाश्च निर्दिष्टा इति वेदितव्यम् ॥

एवं मुमुक्षोरुक्त्वा बुभुक्षोस्तु मूर्तिशान्तिन्यासमाह -

(रुद्रादिकादिशान्ते बुभुक्षोः रुद्रवर्गाणि ।

(साधकस्य प्रतिष्ठायां अनन्ताद्यास्तु मूर्तिपाः ॥) (२८)

In Public domain. Digitization Muthulakshmi Research Academy

शुद्धाध्वनि पुराणादि सन्ति: साचाध्व कथा स्यात्।
नाडीश्रोति दिव्यागमसिद्धान्तेन शुद्धाध्वानि कुर्वन्तो:
साधकानां प्रतिष्ठायां क्रियमाणायां अनन्तादयस्तु
मूर्तिपाः प्रतिखण्डं न्यस्तव्या इति शब्दार्थः। के ते अन-
न्ताद्या इत्यत्र संज्ञया तान्निर्दिशति-

[अनन्तः सूक्ष्मसंज्ञश्च शिवोत्तमस्तथैकनेत्रकः।] २०b

[एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः॥] २१a

विद्येश्वरा द्वैविध्येनोक्ताः प्रागुक्ताः इदानीमन्ये
दृश्यन्ते। [भुवनादिकमायान्ते शुद्धयाथ शुद्धात्मके २१b
ध्वनि] [विज्ञेया मूर्तिपा रुद्रा अङ्गुष्ठमात्रकादयः] इति वा २२a
40 कुड्डुलिङ्ग. प्रतिष्ठायां मूर्तिपा अजवानिति भावः।
केते: अङ्गुष्ठमात्रादयः इत्यत्र संज्ञया तान् क्रमेणोद्दिशति

[अङ्गुष्ठमात्रभुवनेशानास्तैक पिङ्गलः।] २२b

[उद्भवश्च भवश्चैव नाम देवो महाद्युतिः॥] २३a

तदेवं शुद्धाशुद्धेऽध्वनि सिद्धिहेतून् विद्येश्वरान् दर्शि-
यित्वा शुद्धेऽध्वनि सिद्धान्तं दर्शयति-

[अशुद्धेऽध्वनि प्रत्यादिभूतानां तैर्व्यवस्थिता।] २३b

[मूर्तिपाः शतरुद्राणां अष्टौ दिक्ष दिगादिगाः॥] २४a

शतरुद्राणां मध्ये अधा ऊर्ध्वं दिगीशाश्च वर्जयित्वा दि-
गीश्वरेषु ये मुख्यास्ते व्यूहपतयः। तेषां सर्वे
योगिप्रायः। किं संज्ञका विज्ञातास्ते इत्यत्राह-

In Public domain. Digitization Muthulakshmi Research Academy

मू [असितांगो रुरुश्चण्डः क्रोध उन्मत्त भैरवाः ।] २६ a

मू [कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः ॥] २७ b

य ईशमूर्तिशब्देन यथायेते ईशमूर्तयः ॥ प्रागुक्ता

यष्टमायश्च: ईशावरादिव्यर्थं सिद्धमेवतावत् । अथ

पञ्चमूर्तिविकल्पमुक्त्वा पञ्चकलापञ्चमाधिकृत्याह-

मू [पञ्चमूर्तौ भवेन्न्यासो क्ष्मावारिदहनानिलाः ।] २८ a

मू [खञ्चेति मूर्तयो लिङ्गे ब्रह्माद्याः पञ्चमूर्तिपाः ॥] २८ b

बुभुक्षो मुमुक्षोश्चेति वाक्य शेषः । बुभुक्षु मुमुक्षोर्विकल्प

उच्यते-

मा मू [मुमुक्षोर्वा प्रतिष्ठायां निवृत्याद्यास्तु मूर्तिपाः ।] २९ a

मू [सद्योजातादयो लिङ्गे मताः पञ्च तदीश्वराः ॥] २९ b

सुबोध्यमेतत् । यथा लिङ्गे न्यास उक्तः तथा पीठशिलयोरपि

मू क्रमतोऽमूरेशात्मयः । [ईशं पीठशिलायां च न्यासः कार्यो- ३० a

भिधाविषयम्] । व्याख्याता चेयं वक्ष्यमाणतयामिता-

विषयमिति विशेषः स्वयं वक्ष्यत इत्यर्थः । तमेवाह-

मू [क्रियाज्ञाने तथेच्छा च त्रितत्वाधीश्वरा मताः ॥] ३० b

ब्रह्मविष्णुरुद्रा इति वाक्य शेषः । ईश्वरमूर्तित्वेऽपि मूर्ती-

शत्वादमाह-

मू [धारिका दीप्तिरत्युग्रा ज्योत्स्ना चैता बलोत्कटाः ।] ३१ a

मू [धात्री व्याप्तिश मूर्तीशा मताः पीठादिगोचरे ॥] ३१ b

शर्वादय इत्यपवाद वाक्य शेषः । ईशं मुमुक्षु प्रतिष्ठायामेवं मुक्त्वा

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिष्ठान्तरमभिदधानोऽऽह–

मू [साकलस्य प्रतिष्ठा या पीठादौ तु शम्भुमीश्वराः।] ३२b

मू [अनन्ताद्य ईश्वरस्थः त्रीपाठवशमागताः॥] ३२a

विद्येश्वर शान्त्य इति यावत्। तं हि विद्येश्वराणां स्तोत्रं

न संभवति। ततश्च पञ्चहेतपञ्च पदार्था ह्या [माया ज्येष्ठा

मू क्रिया ज्ञान इच्छा चेति विपक्षतः।] ३२b

मू [पीठादौ पञ्चमूर्तीशाः उमार्चना मयोच्यते।] ३३a

उमार्चना शब्दार्थाभिधानादि मुद्रा कर्मस्वरूप्यते। अर्चाप्रतिमा

सा शोफल ज्ञानम्। पीठशिलयोस्तत्राथ पञ्चमाह–

मू [तमोमोहाद्या निष्ठा मृत्युमोहा ज्वराः॥?] ३३b

मू [पञ्चपञ्चे तमोमोहा वैषम्यात् रपञ्चरा ॥?] ३४a

५२. एवं पीठशिलयोः मूर्तीशान्योरभेदमुक्त्वा इदानीं

तारतम्येन पञ्चपञ्चे स्थितानां तु कुमादीनां व्योमान्तानां

मूर्तीनां त्रिष्वपि लिङ्गपीठाश्मसु भवनाधावायोगो

चरं व्याप्तिविशेषमाह–

मू [पञ्चानामपि मूर्तीनां लिङ्गपीठशिलास्वपि।] ३४b

मू [तत्राहत्वव्याप्तितो भेदः क्रमादेवं विभावयेत्॥] ३५a

निगदव्याख्यानम्। कथं सा व्याप्तिरित्याह–

मू [रामान्ते क्षमामङ्कु कालान्तं विद्यां तत्त्व तु नाशनः।] ३५b

मू [वायुरीश्वर पर्यन्तं शिवान्तं (missing) व्योम पीठकम्॥] ३६a - ३७a

मू लिङ्गपीठशिलायास्तु [कुमान्ता क्षमाकलान्तं स्यादमु

मायान्तको मलः॥?] ३७b

In Public domain. Digitization Muthulakshmi Research Academy

शुद्धविद्यान्तको वायुः शान्त्यन्तं व्योमपीठकम् ।

मू भूतान्तो धर्मस्कन्धः शब्दान्तो बाह्यकर्मेन्द्रियान्तकम् ॥ ३८ब

मू [बुद्धीन्द्रियान्तको वायुः व्योमबुद्ध्यन्तमुच्यते ॥] ३९a

अथ पुनरष्टपद्माश्रयावस्थानां धर्मादिमूर्तीनां लिङ्गपीठशिला-

यादृशस्तु व्याप्तौ भावनाक्रमोऽह —

मू [अष्टपत्रे तु पूर्वादि ईशान्तः धर्मादिमूर्तयः । अवस्थाविति ३९ b

ति वाक्यशेषः । पक्षान्तरमाश्रित्याह —

मू [पञ्चपक्षे परेशीच्यां ...... पूर्वं स्वराश्रिताः ॥] ४० a

धर्मादिव्योमान्तमूर्तयः पञ्चेति वाक्यशेषः । धर्मस्तथ्य-

ब्रह्माधिष्ठिता तदनुरूपमपना भावनीया प्रतिमपुद्गा-

मदेव ब्रह्माधिष्ठितमुदीच्यां महेशानि घोरब्रह्माधि-

ष्ठितो याम्यां वायुः तत्पुरुषाधिष्ठितः । पूर्वं व्योमे-

शान ब्रह्माधिष्ठितमैशान्यां भावनीयमित्यभिप्रायः ।

तदयं लिङ्गपीठादिषु व्याप्तिमूर्तीशाविन्यास भावना-

मउ
क्रमोक्तो भवति ॥

43. अथ प्रतिमासु कथमित्याशङ्क्य तत्राप्युक्तं

प्रकारं अतिदिशन्नेव विशेषमाह । [अयमेव क्रमः मू ४० b

सर्वो द्रष्टव्यः प्रतिमास्वपि ।] [किन्तु तत्त्वत्रयन्यासो मू ४१ a

जानुकण्ठशिरोवधि] जान्वन्तमात्मतत्त्वं कण्ठान्तं

विद्यातत्त्वं, शिरोऽन्तं शिवतत्त्वन्यासविशेषोक्त-

त्वात् क्रमात् क्रियते । ततोऽन्यस्तु क्रमो यथापूर्वमेव

In Public domain. Digitization Muthulakshmi Research Academy

कर्तव्य इति द्वारप्रासादप्रतिष्ठयोरपि तत्त्वत्रयादि-

न्यासस्यैवाधीतो भेदमाह-

मू. [द्वारोदुम्बरशाखासु व्याप्तितत्त्वं त्रिखण्डकम्।] ४२b

मू. [जङ्घाकलशचूडान्तं प्रासादेऽपि विचिन्तयेत्॥] ४२a

अयमभिप्रायः। द्वारं त्रिखण्डं कृत्वा यस्तनोदुम्बरादा-

42a रभ्य यस्तन्तीखण्डव्यापकमात्मतत्त्वं मध्यखण्डक-

व्यापकं विद्यातत्त्वं ऊर्ध्वोर्ध्वोदुम्बरेण सहोपरितन-

खण्डव्यापकं शिवतत्त्वं भावयेत्। तथा प्रासादस्य जंघान्तं

गलान्तं चूडान्तेन त्रिधा विभज्योक्त क्रमेण व्याप्तिभाव्य

तत्त्वत्रयन्यासः कर्तव्य इति॥

अथ गौर्यादिप्रतिष्ठायां लिङ्गपिण्डिकयोरिव ज्ञानविन्या-

स प्रकारं व्यवस्थापयति-

मू. [गौर्यादीनां प्रतिष्ठायां पीठे शक्तिं क्रियाभिधाम्।] ४२b

मू. [विग्रहे विन्यसेद् ज्ञानां शैवं पीठवदाचरेत्॥] स्पष्टम्॥ ४३a

मू. [मुखलिङ्गप्रतिष्ठायां पीठे नवपदे कृते।] ४३b

मू. [मध्ये सदाशिवतत्त्वमीशानं प्राची विन्यसेत्॥] ४४a

मू. [आग्नेये विन्यसेद्धियां मायां याम्येऽथ नैर्ऋते।] ४४b

44 मू. [कालाग्निं यतिमायेना वायौ राजमुदङ् नरम्॥
प्रधानमीशदिग्भागे स्वाशासु ब्रह्मपञ्चकम्॥] ४५

स्पष्टम्। तत्त्वत्रयन्यासे विशेषमाह-

मू. [त्रितत्त्वकल्पना प्राग्वत् किन्तु वृत्ते सदाशिवम्।] ४६a

मू [विद्येशसद्योतो प्राग्वन्मूर्तिमूर्तीश्वरानपि ॥] ४६ b

स्पष्टोऽर्थः। अथेदानीं समस्तस्यापि वस्तुजातस्य प्रतिष्ठाभजनीय शिवलिङ्गस्वरूपं यथात्मवेदिना तत्रैवांशांशतो अवसीदं प्रतिष्ठाबीजत्वेनावकाशयितुमिति देशावना परिभाषते।

मू [अथैतन्नवतत्त्वादौ पृथिव्याः प्रतिमास्वपि।] ४७ b

मू [मूर्तिमूर्तीश्वरादीनां व्याप्तिं बीजं च नाम च ॥
ध्यात्वा स्वस्थं सर्वत्र न्यासं कुर्याद्यथास्थितः ॥] ४८

प्रतिमास्वपीति अपि शब्दात् तल्लिङ्गपिण्डकयोरेव। अपितु सर्वत्र प्रतिष्ठापनीयेषु प्रासादप्रभृतिषु सत्य प्रागुक्तं। तस्मात् सामान्य विशेष कारणो विमृश्य स्वं कृत्वा यथास्थितिन्यासः करणीय इत्युक्तं भवति। नवतत्त्वादयस्सदा शिवतत्त्वादयो मुखलिङ्गपीठे नवपदीकृते सत्युक्ता। पृथिव्यादितत्त्ववर्गोक्तं मूर्तयोऽष्टधा पञ्चधा चोक्ता क्षमादयो मूर्तीशाः शर्वादयो विद्येश्वरा महाभैरवान्ता अष्टपदे पञ्चपदे तु ब्रह्मादिकारणेश्वरा पञ्चब्रह्माणि च आदि शब्दः सत्त्वत्रयं ज्ञानक्रियेच्छाश्च सूचयति।

व्याप्ति शब्दः स्वतानां हेतुमद्भावेनान्योन्य-संकलनं सूचयति। संकलनाभावे परसंबन्धाभावात्
45 भुक्तिमुक्त्योः स्वातन्त्र्येण संभूयकारित्वासिद्धिबीज-

शब्दप्रयोग स्यात्। ...... तदयोर्नानां संबन्धो

कारणमीश्वराज्ञां गमयति।

सर्वत्राणि वागीश्वर गर्भानीति वृत्त्या शब्दत्वं शब्दबो-

ध्यत्वं च सूचयति। न हि शब्दः कश्चिदर्थोऽस्ति+इत्याह-

अनेन मन्त्रसाध्यत्वं प्रतिष्ठादि कर्मणः उक्तं भवति।

आरम्भसङ्घो वक्ष्यमाण निमित्तादेः शरीराण्यभिधत्ते।

न ... लोकान्तानां शरीरोपलक्षितानां बुद्ध्यावरोहणं

भवति। निष्कल तथा स्वरूपं यस्य बहुधारो तेऽनुष्ठा-

नार्थं वैकल्प्या तस्मात् सर्वमिदं ध्यात्वा न्यासः कर्तव्य

इति परिभाषासूत्रस्य तात्पर्यार्थः।

अथ यदुक्तं यदास्तीति तद्भावयेत्-

[अधस्तु स्थिता पृथ्वी अप्यादितत्त्वगोचरे।] 45 a

न+पृथिव्या शब्दतन्मात्रान्तानां दशतत्त्वानां आमस्याव-

रणभावेन कार्यकारणभावेनाश्रयाश्रयिभावे उक्तो

वेदितव्यः। अत्र क्ष्मादयः। पञ्चमूर्तयो ऽन्तर्भूते मू-

र्त्यो मनागणिमा यवस्थान पादमाह-

[शब्दतन्मात्रमूर्तौ द्वौ सोमसूर्यौ व्यवस्थितौ।] 45 b

सू [तयोरन्दर्वै च धर्माख्यो] धर्मो ज्योतिष्टोमादिरा-

म्नाय सिद्धः। स एव यज्ञाख्या संज्ञा यस्य स यजमानः

कूटस्थ इति यावत्। तदेवाष्ट मूर्तीनां स्थितिरुक्ता

भवति। अत्र मूर्त्यधिपानां स्थानान्याह-

[गन्धे शर्वो व्यवस्थितः।] मृ. ५०a

मृ [रसात्मतः पशुभृत्यैव मुग्धोऽहंकार गोचरे॥] ५०b

४६ [रुद्रस्तत्रैव कोद्दृश्यो रजतमात्रगो भवः।
ईशानः स्पर्शतन्मात्रे महादेवो मनः स्थितः॥] ५२

[भीमश्च शब्दतन्मात्रे मूर्तीशानां व्यवस्थितिः] ५२a

अत्र मूर्तीश्वरानुरूपमुत्तरामे तेषां स्थापनतारतम्येन साधितो भवन्ति। स चायं वक्ष्यमाणेऽष्टवपि समानो वेदितव्यः। तदेवं मुमुक्षोः मूर्तीशा उक्ताः—

अथ बुभुक्षोस्तानाह—

[विद्येश्वराश्च विज्ञेया विद्यातत्त्वे व्यवस्थिताः।] ५२b

क्षुद्रकर्माणि सुमूर्तिपा अपि उपलक्षिता भवन्ति। तेषां मायाधिकारात् मया वक्तव्ये वक्ष्यमाणस्योन्नेयत्वात्।

अथ पञ्चपदमवलम्ब्य कलापञ्च मूर्तीशानामेव दर्शयति [क्ष्मादि पुंभवो ब्रह्मा क्ष्मादि मायान्तगोऽच्युतः।] मृ ५३a

मृ ५३b [क्ष्मादिविद्यान्तगो रुद्रः क्ष्मादिविद्यान्त ईश्वरः।] [साद-

मृ. ५४a ाख्यः क्ष्मादिनादान्तो शक्तिः क्ष्मादि पराविधिः।] क्ष्मवाधि-

शक्त्यवस्थानां सर्वमूर्तीशानां साक्षात्परम्परया च शक्तिमयत्वं ~~स्थापितं~~ स्थापितं भवति। शक्तिस्मयेनरा शक्तिरपि तु मूर्तिभोगात्मिका कुण्डलिव मूर्ति मूर्तीश प्रकाराहत्वात्। अस्य परशब्दस्य शिवसादाख्यस्य शिवलिङ्गस्थो-वस्था ङ्गं सूचयति। अपरभावे परशब्दव्यावृत्तो

शिवो यथा परावस्थात्मकं तारूपेण मूर्तिपरावस्थे
लिङ्गे लक्षणोद्धारणं व्याप्नोतीति गुरवः। तदेवं शिवलिङ्गस्य
समस्ताध्वात्मदेशव्याप्तिरिति आलयात्मकत्वमुक्तं भवति।

अथ सिद्धान्तेतरसमयस्थानामपि तदेकदेशात्म-
नान्यत्वं सूचयितुं आगमोक्तैव स्थानं दर्शयति।

57. पृथिवी तत्त्वे स्थिता विष्णोः दशावतारमूर्तयः। ५५४
विघ्नेशस्कन्दौ गौणाद्यं विश्वेश्वरगोचराः॥ ५५५

मित्राद्याः केशवाद्याश्च नवम पालाद्वादश त्रिका ५५६
विघ्नराजस्य साधारण्ये तत्त्वे देवी सरस्वती नन्द्यादि शुद्ध ५६
विद्यायां लक्ष्मीः ईश्वर गोचरे॥

प्रकृतौ संस्थिता शैलराजस्य कुक्षौ व्यवस्थिता। ५५७
पुरुषे पाञ्चरात्रस्थाः शिवः सूर्ये व्यवस्थिताः॥

अप्सरो यक्षरक्षांसि विद्याधरा हि किन्नराः।
भूतवेताल डाकिन्यो ग्रह नक्षत्र राशयः॥ ५५८

समुद्रा क्षेत्रपालाद्या नद्यः ब्रह्मा दिगीश्वराः॥
उर्वी तत्त्वे स्थिता ह्येषा जरायुजाण्डजोद्भिजाः। ५५९

अन्येषामपि तत्त्वेषु यत्र यत्र व्यवस्थितिः॥ ५६०
न्यासो शक्तिति किं स्थानं परं तस्य तदेव हि॥

अथ मार्गप्रायः। अयो पञ्चस्तमेवैषां परंस्थानमित्यत्र
प्रमाणं तद्वि पाशुपतमे शिवतत्त्वाश्रयुपगमेऽपि कारणं
तत्त्वरि गृहीता ..... स्वयैवेति सर्वेऽपि समायिनः स्व-
~~न्नेरा~~

In Public domain. Digitization Muthulakshmi Research Academy

-एव शास्त्रात् स्तुपस्वागमे तयोरेव सर्वोत्तरत्वं पुराणेषु तन्त्र-
विप्रतिपत्तेः तत्र सन्देहे सति कस्य परमार्थमिति चेत्
न्यायो येतस्यैवेति वदामः।

न्यायो हि नाम पक्षपातितो वस्तु निर्णयैकान्त-
उपायः तस्मादेनानपुरस्कृत्य वस्तोरेण बोद्धारिरपि
स्वात्मसाक्षित्वं कं विमृश्य परमार्थः स्वीक्रियत
इति नानुपपन्नं किञ्चित्। अतो दाक्षिणां धरादि ते-
षां न्यायेस्वरूपाख्यानार्थं वज्राद्यवयवविशेष-
मन्ये क्वचित् पयोग्यवस्तु भूषणादिकल्पनानुक्रमतो
५८ वस्तुतत्त्व मारभ्यते। तत्र श्लोकमुख्य व्यक्त व्याख्यान-
वो स्थान दर्शितं व्याख्यायते।

मू [चतुर्वक्त्राष्टबाहुश्च पीतापीताम्बरा धरा।
कूर्मस्था सौम्यरूपा च नागाब्धिसरिदावृता॥] ६२

मू ६२० [मेखलाख्यः प्रदीप्तार्चिरित्यादि [शार्ङ्गाख्या मूर्तिरुपामता:] मू ७१०
इत्यन्तं स्पष्टम्। अष्टपक्षं ज्ञातम्। अथ पञ्चपक्षे आह-

मू [तप्तचामीकराकारा चतुर्बाहुर्विभूषिता।] ७४८

मू [वज्रामया क्षमाला च निवृत्तिः परिकीर्तिता॥ इत्यादि

मू [पद्मामयाक्षमालाढ्या शान्त्यतीताऽवरप्रदा।] इत्या- ८४०
न्तं स्पष्टम्। ज्ञाता मूर्तयः पञ्च। अथ भूतिपादेष्वाह-

मू [बालेन्दुधरस्यापि पीनस्कन्धेन्दुशेखरः।] ८४८

मू [अन्य कुण्डलवान् रक्तः कुण्डरीकनिभेक्षणः॥ इत्यादि। ८४६

In Public domain. Digitization Muthulakshmi Research Academy

सद्यो हस्तेषु खड्गं च शक्तिशूलवराभये। इत्यन्तं स्पष्टम्।

पुनरपरं पक्षमाह –

त्रिनेत्रश्चतुर्वक्त्रा हरवद्दशबाहवः। इत्यादि।

त्रिधा शोणा युक्तो पेतं ईशानैक गुणावृतम्। इत्यन्तं

स्पष्टम्। पुनः पञ्चपक्षे आह –

मू ८८a [ब्रह्मा चतुर्मुखः पीतः चतुर्दोर्दण्डमण्डितः।] इत्यादि।

मू ८८b [दशबाहुः प्रसन्नात्मा पञ्चवक्त्रः सदाशिवः।] इत्यन्तं

स्पष्टम्। तत्त्वत्रयमधिकृत्याह –

मू ९४a [चतुर्भुजश्चतुर्वक्त्रः चतुरश्राम्बुजास्थितः।] इत्यादि

मू ९४b [शिवं तत्त्वं स्मृतं हि तत् पञ्चवक्त्रं चतुर्भुजम्।] इत्यन्तं

स्पष्टम्। तदेवं मूर्तिमूर्तीशानां ध्येयस्वरूपाण्युक्तानि।

अथैषां यथोक्तदेशकालयोरन्यथाकरणे दोषमाह –

मू ५१. [स्वदेशकालयोरेव यष्टा इष्टफलप्रदा।] ९६a

मू [आग्नेय्यां दिशि देशं च कालमध्याह्नं प्रपूजयेत्॥] ९६b

मू [स्वाधारदेवानावाह्य देशं कृत्वा बहिः स्थितम्।
कालं द्वादशकाष्ठाख्यं ज्ञेयाहात् स्वीयवत्सरात्॥] ९९

मू [देशाः क्ष्मादिगताः पञ्च भरेशाद्यष्टकं क्रमात्।] १००a

मू [अन्यदेशेऽन्यकालेऽपि तद्देवानिष्टहेतवः॥] ९०b

मू [प्रतिष्ठायां समतो देशकालापादनमाचरेत्।] ९८a

मू [कालः क्षणप्रमुखादिस्तु द्वादशक्रमयोगतः॥] २००b

मू [पञ्च स्वेषु क्रमात् पञ्च ब्रह्माद्याः कारणेश्वराः॥] २०२a

मू {तद्धा प्रान्तस्थिताश्चान्ये देश ... च नाडिकाः ॥} २०२ b

प्रासादपीठमध्ये वा विन्यस्य नव तत्र प्राङ्मुखो रेखास्ता-

वत्यष्ट उदङ्मुखाः स्युः। तथाष्टादश च रेखा नाड्याख्या

मू २०८ b इति। {उभौ कोणगतौ वंशौ रज्जवोऽष्ट बहुपदाः।}

ईशानकोष्ठादारभ्य नैर्ऋतकोणान्तमेका रेखास्तु तथाग्नेय-

कोणादारभ्य यावद्वायव्यकोणान्त्या रेखा चैव देशवंशो

नामके। ततो रज्जुकाष्टेत द्वेशादि योगतः।

यत्र यत्र पदन्यासः तत्र तत्र तदा तदा ॥

न्यसेत् सर्वं मूर्तीशाऽभीष्टार्थफलप्रदा ॥ इति

अथ देश प्रसंगेन दृश्यन्ते वस्तुदेवताः। कियत्यः किंनाम-

कास्ता इत्याह-

मू २०२ b {ब्रह्मेश पर्जन्य जय महेन्द्र रवि सत्यकाः} इत्यादि

मू २०८ b "{त्रिपञ्चाशदथो परम्}" इत्यन्तं स्पष्टम्। अथो पदमित्ये-

तन्निगद्य व्याख्यानम्। अथो इत्यारभ्य वास्तुरूपं वक्तु-

मारभते - प्रागुदीच्यानां रेखा अष्टानामिका। अष्टौ

50 रेखा वंशाख्या वक्ष्यमाणौ भवतः। कोणान्तमुखाः कार्या-

स्तथा करोतीति विशेषः। रज्जुचतुष्टयम् प्रत्येकमत्र त्रि-

मू २०८ a पदं स्यात् चतुष्टयान्तरन्तु बहुबहुपदमिति {चतुष्षष्टि-

पदे वास्तौ भवेदेवं प्रसक्तः।} सुबोधम्।

अथ प्रागुदीच्यानां त्रिपञ्चाशद्देवतानां यथा

यथा वास्तुपदस्थानं पञ्चसंख्यानां च वक्तुमारभते-

In Public domain. Digitization Muthulakshmi Research Academy

उद्दिश्यान्तीति पञ्चाशत् क्रमेणैवात्र देवताः ।
मध्ये चतुष्पदे ब्रह्मा तदनन्तरं मरीचिषट्पदः ॥

ब्रह्मणोऽनन्तरं पङ्क्तौ द्विपदे तद्बाह्यः पङ्क्तौ चैवानित्येवं मरी-
चिषट्पदो भवति । तयोरेव पङ्क्त्योराग्नेयकोणस्थं पद-
द्वयमधिकृत्याऽऽह — "सवितं वह्निकोणस्थं" इत्यादि "रुद्रा-
ख्यस्ततोऽप्यतास" इत्यन्तं स्पष्टम् । उदीच्यां चाह "शिवयक्ष्म-
श" इत्यादि । ईशान्यां चाह — "आपवत्सौ ईशान्ये तु" इत्यादि ।
अथ समन्ताद्बाह्यैकपङ्क्तिमधिकृत्येशानादिप्रदक्षिणतः
आह — "ईशानादिपदमारभ्य" इत्यादि ईशकोणपदार्थे ईशा-
नस्ततो दक्षिणपदपदादारभ्य पर्जन्यजयन्तमहेन्द्ररवि-
सत्यकभृशांश ... षट्कं आग्नेयकोणपदस्यार्धे अन्त-
रिक्षोऽर्धान्तरे सप्तार्चिः । ततः पश्चात्यादारभ्य पूषावितथ-
गृहक्षतप्रेतपतिगन्धर्वभृङ्गराजानां पदस्य षट्कम् । निर्ऋ-
तिकोणकोष्ठस्यार्धे मृगः अर्धान्तरे ऽपि पितृ ततोत्तरपदा-
दारभ्य पितृदौवारसुग्रीवः पुष्पदन्तः प्रचेताः । असुरः
शोष इत्येते षट्पतिकाः । पुनर्वायुकोष्ठस्यार्धे ....
दितिरोगः इत्येवं द्वात्रिंशत्कोष्ठस्यार्धे रोगश्च तदर्धे
वायुः प्रागपदादारभ्य नागमुख्यभल्लाटसोममुख्यादयः
51 षट्पदिकाः पुनरीशानकोष्ठस्यार्धे दितिरेवं द्वात्रिंशद्देवताः
प्रदक्षिणक्रमेण विभाव्य पूजनीया इति । तदेवं मध्ये ब्रह्मा-
णमारभ्य वास्तुदेवो देवता पूजास्तास्संख्यया निगमयति ।

मू २२४ [एवं वास्तु तनौ पञ्च चत्वारिंशत्सुराः स्थिताः।]

अथ वास्तु तनौ बहिरीशानादि ~~क्रमेण~~ कोणकोष्ठ चतुष्टय

प्रान्ते पूज्या राक्षसीराह—

मू २२६ [चरकी च विदारी च] इत्यादि [चत्वारोऽपि बहिः क्रमात्]

इत्यन्तं। एवं चतुष्षष्टिपदं वास्तु मुक्त्वा इदानीमेकाशी-

तिपदं गृहवास्तुमाह—

मू [एकाशीतिपदे वास्तौ मध्ये नवपदावधि।] इत्यादि। २२७ a

मू २२८ "[अन्ये तु पतिकाः स्मृताः]" इत्येतन्निगदव्याख्यानमेतत्॥

स्वारब्धसूत्रपद्धति स्वरूप कालकरणोपसंहरति। [इत

मू २२९ बीजद्वयं दीक्षाप्रतिष्ठाख्ययोर्द्वयोः] [संगृह्य देशिकैः

काले तन्निवपन्ति समीहया] [इत्याहरद्गान्धशतद्वयीं सश्री-

मू २३० सोमभट्टगुरुरागमेभ्यः। काले इत्यादि एकतरं तत्तद्बीज-

द्वयं श्रीवरुणाभिधानः।?]

इति भट्ट शिवोत्तमकृतौ प्रतिष्ठाविवेकप्रकरणं द्वितीयम्॥

॥ हरिः ओम्। शुभमस्तु॥

copied by T.V. Subramania Sastrigal.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy